# VYAKARANA & NYAYA

CORECOURSE

For

## BA SANSKRIT

V SEMESTER

(2011 Admission)

# UNIVERSITY OF CALICUT

**SCHOOL OF DISTANCE EDUCATION**

CALICUT UNIVERSITY PO, MALAPPURAM, KERALA, INDIA - 673 635

# UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

# BA SANSKRIT

V SEMESTER

CORE COURSE

## VYAKARANA & NYAYA

*Prepared by :* *Dr. K. Jayanisha. K,*
*Assistant Professor,*
*Department of Sanskrit,*
*Sree Kerala Varma College,*
*Thrissur.*

*Scrutinized by:* *Dr. K. Jayanarayanan,*
*Associate Professor,*
*Department of Sanskrit,*
*Sree Kerala Varma College,*
*Thrissur.*

Layout: Computer Section, SDE

**(c)**
Reserved

# SYLLABUS


| | | | |
|---|---|---|---|
| **Module I** | **:** | **Samiñāprakaranam and Paribhāsāprakaranam** | **4** |
| **Module II** | **:** | **Acsandhi. Halsandhi. Visargasandhi** | **16** |
| **Module III** | **:** | **Subanta Prakaranam. Aianta Pulliṅga Prakaranam and Aianta Strīliṅga Prakaranam - Prakrivās of Rāmaśabda and Ramāśabda.** | **53** |
| **Module IV** | **:** | **Bhvādi Prakaranam - Prakrivā of Bhū Dhātu in all Lakāras.** | **67** |
| **Module V** | **:** | **Tarkasaṅgraha of Annambhatta (whole) Pratvaksakānda onlv with Dīpikā.** | **102** |


## Essential Reading

1. *Siddhāntakaumudī* of Bhattojidīksita.
2. *Tarkasaṅgha* of Annambhatta with *Dīpikā*.

## Additional Reading

1. *Laghupāninīvam* - A. R. Rajaraja Varma.
2. *Laghusiddhāntakaumudī* - Bālahitaisinībhāsāvvākhvā bv Prof. R. Vasudevan Potti.
3. *Primer Indian Logic* - Kuppusvami Sastri.
4. *Prakrivāsarvasvam* - Melputtūr Nārāvanabhatta.

| | | | |

# MODULE - I

# संज्ञाप्रकरणम्।

## मङ्गलश्लोकः

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।**

**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते।।**

## संज्ञाप्रकरणम्

### १. हलन्त्यम्। (१-३-३)

हल् अन्त्यम् इति पदच्छेदः। हलि अन्त्यम् हलन्त्यमिति विग्रहः। 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् 'उपदेशे', 'इत्' इत्येतौ अनुवर्तेते। उपदेशः आद्योच्चारणम्। महेश्वर-पाणिन्यादीनामुच्चारणमित्यर्थः। अन्त्यमित्यनेन धातुप्रातिपदिकनिपातप्रत्याहारसूत्रप्रत्ययादेशा-गमानामन्त्यमिति भाष्यम्। एवं च उपदेशेऽन्त्यं हलित्स्यात् इति सूत्रार्थः। अनेन सूत्रेण व्यञ्जनानां इत्संज्ञा विधीयते।

यथा - अ इ उण् इति माहेश्वरसूत्रे अन्त्यस्य हलः णकारस्य अनेन सूत्रेण इत्संज्ञा। एवम् ऋ लृक् इत्यादौ ककारादीनामपि।

### २. आदिरन्त्येन सहेता। (१-१-७१)

आदिः अन्त्येन सह इता इति पदच्छेदः। परस्मिन् सति यस्मात्पूर्वो नास्ति सः आदिः। पूर्वस्मिन् सति यस्मात्परो नास्ति सः अन्त्यः। एवं च अन्त्येनेता सहितः आदिः मध्यगानां स्वस्य च संज्ञा स्यादिति सूत्रार्थः।

यथा - अण्। अ इ उण् इत्यत्र इत्संज्ञकः अन्त्यः वर्णः णकारः। तेन सह उच्चार्यमाण आदिः अण् इति। सः मध्ये वर्तमानयोः इ, उ इत्यनयोः, स्वस्य (आदेरकारस्य) च संज्ञा स्यात्। एवम् अच्, हल्, अलित्यादयः। एते प्रत्याहाराः इति व्यवह्रियन्ते।

### ३. उपदेशेऽजनुनासिक इत्। (१-३-२)

उपदेशे अच् अनुनासिकः इत् इति पदच्छेदः। एवं च उपदेशे अनुनासिकोऽजित्संज्ञः। स्यादिति सूत्रार्थः। अनेन सूत्रेण अनुनासिकस्वराणां इत्संज्ञा विधीयते।

## ४. ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (१-२-२७)

ऊकालः अच् ह्रस्वदीर्घप्लुतः इति पदच्छेदः। ह्रस्वश्च दीर्घश्च प्लुतश्च एषां समाहारः ह्रस्वदीर्घप्लुतः इति समाहारद्वन्द्वः। उ ऊ ऊ३ इति त्रयाणामेकमात्रद्विमात्रत्रिमात्राणां द्वन्द्वसमासे सति सवर्णदीर्घेण ऊ इति प्रश्लिष्टनिर्देशः। तेषां कालः ऊकालः। कालशब्दः मात्रापर्यायः। ऊकालः कालः यस्येति विग्रहः। ऊकालशब्दे पूर्वपदे उत्तरखण्डस्य कालशब्दस्य लोपः भवति। एवं च उश्च ऊश्च ऊ३श्च वः, वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यादिति सूत्रार्थः। वः इति ऊशब्दस्य प्रथमाबहुवचनम्। वामिति षष्ठीबहुवचनम्।

## ५. उच्चैरुदात्तः। (१-२-२९)

उच्चैः उदात्तः इति पदच्छेदः। 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रात् अजित्यनुवर्तते। एवं च ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यादिति सूत्रार्थः। सभागेषु इति ताल्वादीनां सावयवत्वकथनमूर्ध्वभागे इत्यस्योपपादनार्थमेव। अनेन सूत्रेण उदात्तसंज्ञा विधीयते।

यथा - 'आ ये मित्रावरुणा' इत्यृचि आकारः एकारश्च उदात्तः।

## ६. नीचैरनुदात्तः। (१-२-३०)

नीचैः अनुदात्तः इति पदच्छेदः। 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रात् अजित्यनुवर्तते। एवं च ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यादिति सूत्रार्थः। अनेन सूत्रेण अनुदात्तसंज्ञा विधीयते।

यथा - 'अर्वाङ् यज्ञस्संक्राम' इत्यृचि आद्यः अकारः अनुदात्तः।

## ७. समाहारः स्वरितः। (१-२-३१)

समाहारः स्वरितः इति द्विपदं सूत्रम्। 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रादजित्यनुवर्तते। 'उच्चैरुदात्तः' इति सूत्रादुदात्तः, 'नीचैरनुदात्तः' इति सूत्रादनुदात्तः च अनुवर्तते। एवं च उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् इति सूत्रार्थः। अनेन सूत्रेण स्वरितसंज्ञा विधीयते।

## ८. तस्यादित उदात्तमर्धह्रस्वम्। (१-२-३२)

तस्य आदितः उदात्तम् अर्धह्रस्वम् इति पदच्छेदः। ह्रस्वग्रहणमतन्त्रम्। अविवक्षितमित्यर्थः। एवं च स्वरितस्यादावर्धमुदात्तं स्यादिति सूत्रार्थः।

यथा - अग्निमी॑ळे।

अत्र आदावुदात्तश्रुतिः। पदकाले अग्निमित्यन्तोदात्तम्। ईळ इति अनुदात्तम्। तत्र 'उदात्तादनुदात्तस्य स्वरितः' इति संहितायाम् ईकारः स्वरितः।

स नवविधोऽपि (ह्रस्वोदात्तः, ह्रस्वानुदात्तः, ह्रस्वस्वरितः, दीर्घोदात्तः, दीर्घानुदात्तः, दीर्घस्वरितः, प्लुतोदात्तः, प्लुतानुदात्तः, प्लुतस्वरितः) प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा।

## ९. मुखनासिकावचनोऽनुनासिकः। (१-१-८)

मुखनासिकावचनः अनुनासिकः इति पदच्छेदः। मुखसहिता नासिका मुखनासिका इति मध्यमपदलोपिसमासः। मुखनासिकया वचनः मुखनासिकावचनः। एवं च मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यादिति सूत्रार्थः। अनेन सूत्रेण अनुनासिकसंज्ञा विधीयते। यथा - ङ, ञ, ण, न, माः अनुनासिकाः भवन्ति। अचाम् अनुनासिकाननुनासिकाभेदौ स्तः। अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादशभेदाः। लृ वर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।

## १०. तुल्यास्यप्रयत्नं सवर्णम्। (१-१-९)

तुल्यास्यप्रयत्नं सवर्णम् इति द्विपदं सूत्रम्। आस्यं - मुखम्। प्रकृष्टो यत्नः प्रयत्नः। आस्यं च प्रयत्नश्च आस्यप्रयत्नौ, आभ्यन्तरप्रयत्नमित्यर्थः। तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम्। एवं च ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च इत्येतत् द्वयं यस्य वर्णस्य येन वर्णेन तुल्यं तन्मिथः सवर्णसंज्ञं स्यादिति सूत्रार्थः। अनेन सूत्रेण सवर्णसंज्ञा विधीयते।

यथा - अवर्णस्य अष्टादशभेदानामपि स्थानं कण्ठः, विवृतं प्रयत्नः। अतः तेषां मिथः सावर्ण्यम्।

**वर्णानां स्थानानि।**

१. अकुहविसर्जनीयानां कण्ठः - अ, क ख ग घ ङ, ह, ः।

२. इचुयशानां तालु - इ, च छ ज झ ञ, य, श।

३. ऋटुरषाणां मूर्धा - ऋ, ट ठ ड ढ ण, र, ष।

४. लृतुलसानां दन्तः - लृ, त थ द ध न, ल, स।

५. अपूपध्मानीयानामोष्ठौ - ᳵप ᳵफ । यथा - वृक्षᳵ फलति ।

६. ञमङणनानां नासिका च - ञ, म, ङ, ण, न।

७. एदैतोः कण्ठतालु - ए (अ + इ), ऐ (अ + ए)

८. ओदौतोः कण्ठोष्ठम् - ओ (अ + उ), औ (अ + ओ)

९. वकारस्य दन्तोष्ठम् - व।

१०. जिह्वामूलीयस्य जिह्वामूलम् - ᳲक, ᳲख । यथा - रामᳲकरोति ।

११. नासिकानुस्वारस्य।

यत्नो द्विधा - आभ्यन्तरः बाह्यश्च।

आभ्यन्तरप्रयत्नः चतुर्धा (प्रयतनम् - प्रयत्नः)

१. स्पृष्टम् - स्पर्शानाम् - क - म।

२. ईषत्स्पृष्टम् - अन्तःस्थानाम् - य, व, र, ल।

३. विवृतम् - ऊष्मणां स्वराणां च - श, ष, स, ह, अ-अः।

४. संवृतम् - ह्रस्वस्यावर्णस्य प्रयोगस्य। प्रक्रियादशायां तु विवृतमेव।

## ११. अ अ। (८-४-६८)

अ अ इति द्विपदं सूत्रम्। इदं व्याकरणशास्त्रस्यान्तिमं सूत्रम्। तत्र अ इति प्रथमं पदं विवृतपरं लुप्तषष्ठीकम्। द्वितीयं तु संवृतपरं लुप्तप्रथमाकम्। एवं च अवर्णस्य विवृतमनूद्य संवृतो अनेन सूत्रेण विधीयते।

## १२. पूर्वत्रासिद्धम्। (८-२-१)

पूर्वत्र असिद्धम् इति पदच्छेदः। 'अष्टाध्याय्या'म् अष्टमेऽध्याये द्वितीये पादे आदिमं सूत्रमिदम्। इतः पूर्वं सपादसप्ताध्यायीति व्यवह्रियते। परञ्च त्रिपादीति। पूर्वत्र इत्यस्य पूर्वस्मिन् शास्त्रे प्रवर्तितव्ये इत्यर्थः। पूर्वं सपादसप्ताध्यायीं प्रति परं त्रिपाद्यसिद्धा इत्यर्थः। इदञ्च अधिकारसूत्रम्। अतः त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमिति सूत्रार्थः।

बाह्यप्रयत्नस्तु एकादशधा - विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितः।

विवारः, श्वासः, अघोषः - खर् ( खफछठथ चटतव्, कपय्, शषसर्)।

तत्र वर्गाणां प्रथमद्वितीयाः खयः, तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ, विसर्गः, शषसाश्च।

संवारः, नादः, घोषः - हश् (हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्) किञ्च हशां यमाः, अनुस्वारश्च।

अल्पप्राणः - वर्गाणां प्रथमतृतीयपञ्चमाः। प्रथमतृतीययमौ यरलवाश्च (यवरट्, लण्, ञमङणनम्, जबगडदश्, चटतव्, कपय्)।

महाप्राणः - वर्गाणां द्वितीयचतुर्थौ शलश्च (झभञ्, घढधष्, खफछठथ, शषसर्, हल्)।

उदात्तः, अनुदात्तः, स्वरितः - अच् (अइउण्, ऋलृक्, एओङ्, ऐऔच्)।

१. कादयो मावसानाः स्पर्शाः।

२. यरलवा अन्तःस्थाः।

३. शषसहा ऊष्माणः।

४. अचः स्वराः।

५. ᳲक ᳲप इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ।

६. अं अः इत्यचः परावनुस्वारविसर्गौ।

इति स्थानयत्नविवेकः।

**वा.१. ऋलृवर्णयोर्मिथः सावर्ण्यम्। (वा. १५०).**

ऋकारलृकारयोः आभ्यन्तरप्रयत्नः विवृतः। किन्तु ऋकारस्य स्थानः मूर्धा, लृकारस्य दन्तश्च। तथापि तेषां मिथः सावर्ण्यं वाच्यमिति वार्तिककारेण कात्यायनेन उच्यते।

अकारहकारयोरिकारशकारयोर्ऋकारषकारयोर्लृकारसकारयोश्च मिथः सावर्ण्ये प्राप्ते-

**१३. नाज्झलौ। (१-१-१०)**

न आज्झलौ इति पदच्छेदः। आच् च हल् च आज्झलौ इति विग्रहः। आकारसहितः अच् आच्। एवं च सः आच् च हल् च इत्येतौ मिथः सवर्णौ न स्तः इति सूत्रार्थः।

यथा - (१) दधि + हरति इत्यत्र हकारस्य अकारसवर्णे सति 'इको यणचि' इति सूत्रेण यण् प्राप्तः। किन्तु अत्र 'नाज्झलौ' इति सूत्रेण अकारहकारयोः सावर्ण्यनिषेधे यण् न प्राप्तः। अतः दधि हरति इत्येव रूपम्।

(२) दधि + शीतलम् इत्यत्र इकारशकारयोः सावर्ण्ये सति 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घं संभवति। किन्तु नाज्झलौ इति सूत्रेण इकारशकारयोः सावर्ण्यनिषेधात् दीर्घो न भवति।

**१४. अणुदित्सवर्णस्य चाप्रत्ययः। (१-१-६९)**

अण्, उदित्, सवर्णस्य, च, अप्रत्ययः इति पदच्छेदः। अत्र अण् इति परेण णकारेण (लण्) प्रत्याहारः। अचां, ह, य, व, र, ल इत्येतेषाञ्च ग्रहणम्। उद् इत् यस्य सः उदित्। कु चु टु तु पु एते उदितः। प्रतीयते इति प्रत्ययः। न प्रत्ययः अप्रत्ययः। अविधीयमानः इत्यर्थः। अप्रत्ययः इति अण् इत्यस्यैव विशेषणम्। एवं च अविधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यादिति सूत्रार्थः।

यथा - अ इत्यष्टादशानां संज्ञा। तथा इकारोकारौ। ऋलृवर्णयोर्मिथः सावर्ण्यात् ऋ इति त्रिंशतः संज्ञा। एवम् लृकारोऽपि। एचो द्वादशानाम्। 'ऐऔच्' इति सूत्रारम्भसामर्थ्यात् एदैतोरोदौतोश्च न मिथः सावर्ण्यम्। तेनैव चतुर्विंशतेः संज्ञा स्युरिति नापादनीयम्। अनुनासिकाननुनासिकभेदेन यवला द्विधा। तत्र अननुनासिकैः तैः अनुनासिकानामपि ग्रहणम्।

### १५. तपरस्तत्कालस्य। (१-१-७०)

तपरः तत्कालस्य इति पदच्छेदः। तः परः यस्मात् सः तपरः, तात्परोऽपि तपरः। यस्मात् वर्णात् तकारोऽव्यवहितपरः सः तपरः। तकारादव्यवहितवर्णोऽपि तपरः। तत्कालस्य इत्यत्र तच्छब्देन उच्चार्यमाणो वर्णो गृह्यते। एवं च तः परो यस्मात्स च तात्परश्च उच्चार्यमाणः समकालस्यैव संज्ञा स्यादिति सूत्रार्थः।

यथा - 'अदेङ् गुणः' इति सूत्रे अवर्णात् परः तकारः तस्मात्परः एङिति उभयोरपि तपरत्वम्। अत्र अकारः एकमात्रिकः, एङ् च द्विमात्रिकः। अतः 'तपरस्तत्कालस्य' इति सूत्रेण एकमात्रिकस्याकारस्य द्विमात्रिकयोरेकारौकारयोश्च गुणसंज्ञा। तत्प्रयोजनन्तु गङ्गा उदकमित्यादौ स्थानिनोः त्रिमात्रिकत्वेऽपि आदेशः गुणः द्विमात्रिक एव।

अनेन सूत्रेण 'अत्' 'इत्' इत्यादयः षण्णां षण्णां संज्ञाः। 'ऋत्' इति द्वादशानाम्।

### १६. वृद्धिरादैच्। (१-१-१)

वृद्धिः आत् ऐच् इति पदच्छेदः। आत् इत्यनेन दीर्घाकारः गृह्यते। ऐच् इत्यस्य ऐ, औ वर्णौ गृह्येते। एवं च आदैच्च वृद्धिसंज्ञः स्यादिति सूत्रार्थः। अनेन सूत्रेण वृद्धिसंज्ञा विधीयते।

### १७. अदेङ् गुणः। (१-१-२)

अत् एङ् गुणः इति पदच्छेदः। अत् इति ह्रस्वाकारः। एङ् प्रत्याहारेण ए ओ वर्णौ गृह्येते। एवञ्च अदेङ् च गुणसंज्ञः स्यादिति सूत्रार्थः। अनेन सूत्रेण गुणसंज्ञा विधीयते ।

### १८. भूवादयो धातवः। (१-३-१)

भूवादयः धातवः इति द्विपदं सूत्रम्। भूश्च वाश्च भूवौ। आदिश्च आदिश्च आदी। प्रथम आदिशब्दः प्रभृतिवचनः। द्वितीयस्तु सदृशवचनः। भूवौ आदी येषां ते भूवादयः। एवं च क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः इति सूत्रार्थः। भूप्रभृतयः वासदृशाश्च धातुसंज्ञाः स्युः इत्यर्थः। अनेन सूत्रेण धातुसंज्ञा विधीयते।

### १९. प्राग्रीश्वरान्निपाताः। (१-४-५६)

प्राक् रीश्वरात् निपाताः इति पदच्छेदः। रीश्वरशब्दः 'अधिरीश्वरे' इति सूत्रैकदेशस्य अनुकरणम्। एवं च रीश्वरशब्दात् प्राक् निपातसंज्ञकाः प्रत्येतव्या इति सूत्रार्थः।

### २०. चादयोऽसत्त्वे। (१-४-५७)

चादयः असत्त्वे इति पदच्छेदः। चः आदिः येषां ते चादयः। सत्त्वम् द्रव्यम्। लिङ्गसंख्याकारकान्वितं द्रव्यम्। न सत्त्वम् असत्त्वम्। अद्रव्यमित्यर्थः। एवं च अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः इति सूत्रार्थः।

## २१. प्रादयः। (१-४-५८)

प्रादयः इति एकपदं सूत्रम्। 'चादयोऽसत्त्वे' इति सूत्रात् असत्त्वे इत्यनुवर्तते। 'प्राग्रीश्वरान्निपाताः' इति सूत्रात् निपाताः इति च। एवं च अद्रव्यार्थाः प्रादयः निपातसंज्ञाः स्युः इति सूत्रार्थः।

## २२, २३. उपसर्गाः क्रियायोगे। (१-४-५९), गतिश्च। (१-४-६०)

उपसर्गाः क्रियायोगे इति द्विपदं सूत्रम्। गतिः च इति 'गतिश्च' इति सूत्रस्य पदच्छेदः। 'प्रादयः' इति सूत्रमनुवर्तते। एवं च प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः इति सूत्रार्थः। एते यथाक्रमम् उपसर्गसंज्ञा, गतिसंज्ञा च विधायकसूत्रे भवतः।

प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप - एते प्रादयः।

## २४. न वेति विभाषा। (१-१-४४)

न वा इति विभाषा इति पदच्छेदः। एवञ्च निषेधविकल्पयोर्विभाषा संज्ञा स्यादिति सूत्रार्थः। अनेन सूत्रेण विभाषासंज्ञा विधीयते ।

## २५. स्वं रूपं शब्दस्याशब्द संज्ञा। (१-१-६८)

स्वम् रूपम् शब्दस्य अशब्दसंज्ञा इति पदच्छेदः। शब्दे संज्ञा शब्दसंज्ञा, न शब्दसंज्ञा अशब्दसंज्ञा। एवं च शब्दशास्त्रे या संज्ञा तां विना शब्दस्य स्वं रूपं संज्ञि स्यादिति सूत्रार्थः।

## २६. येन विधिस्तदन्तस्य। (१-१-७२)

येन विधिः तदन्तस्य इति पदच्छेदः। येन इति करणार्थे तृतीया। उपकरणं व्याकरणशास्त्रे विशेषणम्। एवं च विशेषणं स्वस्य च रूपस्य तदन्तस्य संज्ञा स्यादिति सूत्रार्थः।

## वा. २. समासप्रत्ययविधौ प्रतिषेधः।

समासविधौ प्रत्ययविधौ च तदन्तविधेः प्रतिषेधो वाच्यः इत्यर्थः।

समासविधिः यथा - कृष्णम् + श्रितः इत्यत्र 'द्वितीया श्रिते'ति कृष्णश्रितः इति समासः। किन्तु श्रितशब्देन समासः इत्युक्तौ परमाश्रितः इति शब्देन समासो न भवति। (कृष्णम् + परमाश्रितः - अत्र न समासः)

प्रत्ययविधिः यथा - 'गर्गादिभ्यो यञ्' इति गर्गादिशब्देभ्यः तस्यापत्यमित्यर्थे यञ् प्रत्ययः विहितः। सः परमगर्गः इत्यादिशब्देभ्यः न भवति।

## वा ३. उगिद्वर्णग्रहणवर्जम्।

प्रत्ययविधौ यः प्रतिषेधः उक्तः सः उगिद्वर्णग्रहणवर्जं प्रवर्तते इत्यर्थः।

उगित्ग्रहणे यथा - 'उगितश्च' इति सूत्रेण ङीप् विधीयते। सः उगितन्तादपि भवति। अतिपचन्ती इत्यादि।

वर्णग्रहणे यथा - 'अतः इञ्' इति अपत्यार्थे इञ् प्रत्ययः विधीयते। सः अकारान्तात् प्रातिपदिकात् भवति। दक्षस्य अपत्यम् दाक्षिः इति।

## २७. विरामोऽवसानम्। (१-४-११०)

विरामः अवसानम् इति पदच्छेदः। विरम्यते अस्मिन्निति विरामः। एवं च वर्णानामभावो अवसानसंज्ञः स्यादिति सूत्रार्थः। अनेन सूत्रेण अवसानसंज्ञा विधीयते ।

## २८. परः सन्निकर्षः संहिता। (१-४-१०९)

परः सन्निकर्षः संहिता इति त्रिपदं सूत्रम्। परः - अतिशयितः, सन्निकर्षः - सन्निधिः/सामीप्यम्। एवं च वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यादिति सूत्रार्थः। अनेन सूत्रेण संहितासंज्ञा विधीयते।

## २९. सुप्तिङन्तं पदम्। (१-४-१४)

सुप् च तिङ् च सुप्तिङौ, सुप्तिङौ अन्ते यस्य तत् सुप्तिङन्तम् इति विग्रहः। एवं च सुबन्तं तिङन्तं च पदसंज्ञं स्यादिति सूत्रार्थः। अनेन सूत्रेण पदसंज्ञा विधीयते।

सुबन्तं यथा - रामः, रामौ, रामाः।

तिङन्तं यथा - भवति, भवतः, भवन्ति।

| सुप्प्रत्ययाः/विभक्तिप्रत्ययाः (२१) - | | | तिङ्प्रत्ययाः (९ + ९) | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | परस्मैपदप्रत्ययाः (९) | | | आत्मनेपदप्रत्ययः (९) | | |
| सु | औ | जस् | तिप् | तस् | झि | त | आताम् | झ |
| अम् | औट् | शस् | सिप् | थस् | थ | थास् | आथाम् | ध्वम् |
| टा | भ्याम् | भिस् | मिप् | वस् | मस् | इट् | वहि | महिङ् |
| ङे | भ्याम् | भ्यस् | | | | | | |

ङसि  भ्याम्  भ्यस्

ङस्  ओस्  आम्

ङि  ओस्  सुप्

**३०. हलोऽनन्तराः संयोगः। (१-१-७)**

हलः अनन्तराः संयोगः इति पदच्छेदः। न विद्यते अन्तरं येषां ते अनन्तराः। अव्यवहिताः इत्यर्थः। एवं च अज्भिव्यवहिता हलः संयोगसंज्ञाः स्युः इति सूत्रार्थः। अनेन सूत्रेण संयोगसंज्ञा विधीयते।

यथा - क्ष्म इत्यत्र क् ष् म् इति व्यञ्जनानि अज्भिः अव्यवहिताः स्युः। अत एव एतेषां व्यञ्जनानां संयोग इति संज्ञा।

**३१. ह्रस्वं लघु। (१-४-१०)**

ह्रस्वं लघु इति द्विपदं सूत्रम्। ह्रस्वं लघुसंज्ञं स्यादिति सूत्रार्थः। अनेन सूत्रेण लघुसंज्ञा विधीयते।

**३२. संयोगे गुरु। (१-४-११)**

संयोगे गुरु इति द्विपदं सूत्रम्। 'ह्रस्वं लघु' इति सूत्रात् ह्रस्वमित्यनुवर्तते। एवं च संयोगे परे ह्रस्वं गुरुसंज्ञं स्यादिति सूत्रार्थः।

**३३. दीर्घं च। (१-४-१२)**

दीर्घं च इति द्विपदं सूत्रम्। दीर्घं च गुरुसंज्ञं स्यादिति सूत्रार्थः।

– – – – –

## परिभाषाप्रकरणम्।

**१. इको गुणवृद्धी। (१-१-३)**

इकः गुणवृद्धी इति पदच्छेदः। इकः इति षष्ठ्यन्तम् । 'अदेङ् गुणः' इति सूत्रात् गुणः इति, 'वृद्धिरादैच्' इति सूत्रात् वृद्धिः इति च अनुवर्तेते। एवं च गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते इति सूत्रार्थः।

यथा - 'सार्वधातुकार्धधातुकयोः', 'मिदेर्गुणः' इत्याद्युदाहरणम्।

**२. अचश्च। (१-२-२८)**

अचः च इति पदच्छेदः। अचः इति षष्ठ्यन्तं पदम्। 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रात् 'अच् ह्रस्वदीर्घप्लुतः' इत्यनुवर्तते। एवं च ह्रस्वदीर्घप्लुतशब्दैः यत्र अच् विधीयते तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते इति सूत्रार्थः।

यथा - 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्याद्युदाहरणम्।

## ३. आद्यन्तौ टकितौ। (१-१-४६)

आद्यन्तौ टकितौ इति द्विपदं सूत्रम्। आदिश्च अन्तश्च आद्यन्तौ। टश्च क् च टकौ। टकारात् अकारः उच्चारणार्थः। टकौ इतौ ययोः तौ टकितौ। एवं च टकितौ यस्योक्तौ तस्य क्रमात् आद्यन्तावयवौ स्तः इति सूत्रार्थः।

यथा - अडागमः आद्यावयवः, तुगागमः अन्तावयवः।

## ४. मिदचोऽन्त्यात्परः। (१-१-४७)

मित् अचः अन्त्यात् परः इति पदच्छेदः। मकारः इत् यस्य सः मित्। अचः इति निर्धारणे षष्ठी। अचां मध्ये इत्यर्थः। एवं च अचां मध्ये योऽन्त्यः तस्मात्परः तस्यैव अन्तावयवो मित्स्यात् इति सूत्रार्थः।

यथा - मुच् धातोः लटि मुच् ति इति स्थिते तत्र नुमागमः भवति। सः उकारात् परः भवति। तत्र यद्यपि एकैव अच् वर्तते तथापि व्यपदेशिवद्भावेन अचां मध्ये योऽन्त्यः इति व्यवहारः। एवं तत्र उकारात्परे नुमागमे मुन् च इति जाते नकारस्य श्चुत्वेन ञकारे मुञ्चति इति रूपम्।

## ५. षष्ठी स्थानेयोगा। (१-१-४९)

षष्ठी स्थानेयोगा इति द्विपदं सूत्रम्। स्थानं प्रसङ्गः। स्थानेन योगो यस्याः सा स्थानेयोगा। एवं च अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या इति सूत्रार्थः।

यथा - इको यणचि इति सूत्रे इकः इत्यस्य इकः स्थाने इत्यर्थः।

## ६. स्थानेऽन्तरतमः। (१-१-५०)

स्थाने अन्तरतमः इति पदच्छेदः। स्थानं प्रसङ्गः/प्रसक्तिः, अन्तरम् सदृशम्। अत्यन्तम् अन्तरः अन्तरतमः इति विग्रहः। एवं च प्रसङ्गे सति सदृशतम आदेशः स्यादिति सूत्रार्थः।

यथा - इको यणचि इति सूत्रेण इकः स्थाने यण् आदेशः स्यात्। तत्तु सदृशतमः। अत्र तालव्यस्य इकारस्य स्थाने तालव्यः यकारः आदेशः स्यात्। एवं चाऽन्येपि।

## ७. तस्मिन्निति निर्दिष्टे पूर्वस्य। (१-१-६६)

तस्मिन् इति निर्दिष्टे पूर्वस्य इति पदच्छेदः। तस्मिन्निति इत्यस्य सप्तम्यन्तमित्यर्थः। एवं च सप्तमीनिर्दिशेन विधीयमानं कार्यं वर्णान्तरेणाऽव्यवहितस्य पूर्वस्य बोध्यम् इति सूत्रार्थः।

यथा - इको यणचि इति सूत्रे अचि इति सप्तमीविभक्त्या विधीयमानं यणादेशं वर्णान्तरेण अव्यवहितस्य पूर्वस्य इकः स्थाने स्यात्।

## ८. तस्मादित्युत्तरस्य। (१-१-६७)

तस्मात् इति उत्तरस्य इति पदच्छेदः। तस्मादिति इत्यस्य पञ्चम्यन्तमित्यर्थः। एवं च पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयमिति सूत्रार्थः।

## ९. अलोऽन्त्यस्य। (१-१-५२)

अलः अन्त्यस्य इति पदच्छेदः। अन्त्यस्य अलः इत्यर्थः। अल् वर्णपर्यायम्। एवञ्च षष्ठीनिर्दिष्टस्यान्त्यस्यालः आदेशः स्यादिति सूत्रार्थः।

यथा - तच्छब्दस्य 'त्यदादीनाम् अः' इति सूत्रेण अकारादेशः विधीयते। सः अकारादेशः तच्छब्दस्य अन्त्यस्य दकारस्य भवति।

(तत् सु इति स्थिते अकारादेशे त अ सु इति जाते 'अतो गुणे' इति सूत्रेण गुणे त सु इति स्थिते 'ततोः ससावनन्त्ययोः' इति सकारादेशे स सु इति जाते रुत्वविसर्गे सः इति रूपम्।

## १०. ङिच्च। (१-१-५३)

ङित् च इति पदच्छेदः। ङ् इत् यस्य सः ङित्। 'अलोऽन्त्यस्य' इति सूत्रमनुवर्तते। एवं च ङित् च आदेशः अन्त्यस्यैव अलः स्यादिति सूत्रार्थः। ङित् अनेकालपि अन्त्यस्यैव अलः स्यात्। एतत् सूत्रम् 'अनेकाल्शित्सर्वस्य' इति सूत्रस्यापवादः।

यथा - गो अग्रम् इति स्थिते 'अवङ् स्फोटायनस्य' इति सूत्रेण विकल्पेन अवङादेशः विधीयते। अवङ् अनेकाल्। अतः सर्वादेशः प्राप्तः। किन्तु ङित्वात् अवङ् अन्तादेशैव भवति। ओकारस्य अवङादेशे गव अग्रम् (ग् अव अग्रम्) इति जाते सवर्णदीर्घे गवाग्रम् इति रूपम्।

## ११. आदेः परस्य। (१-१-५४)

आदेः परस्य इति द्विपदं सूत्रम्। परस्य आदेः इत्यर्थः। एवं च परस्य यद्विहितं तत् तस्य आदेर्बोध्यम् इति सूत्रार्थः। इदं सूत्रम् 'अलोऽन्त्यस्य' इत्यस्यापवादः।

यथा - 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण उदः परयोः स्था स्तम्भा इत्यनयोः पूर्वसवर्णः विधीयते। सः स्था स्तम्भा इत्यनयोः आदेः सकारस्य भवति।

## १२. अनेकाल्शित्सर्वस्य। (१-१-५५)

अनेकाल् शित् सर्वस्य इति पदच्छेदः। न एकः अनेकः, अनेकः अल् यस्य सः अनेकाल् । श् इत् यस्य सः शित्। अनेकाल् च शित् च अनयोः समाहारः अनेकाल्शित्। एवं च अनेकाल् शित् च आदेशः सर्वस्य स्यादिति सूत्रार्थः। एतत्तु 'अलोऽन्त्यस्य' इति सूत्रस्यापवादः' यत्र तु 'आदेः परस्य', 'अनेकाल्शित्सर्वस्य' इत्यनयोः युगपत् प्राप्तिः तत्र 'आदेः परस्य' इति सूत्रमपि परत्वात् अनेन सूत्रेण बाध्यते।

यथा - 'अष्टाभ्य औश्' इति सूत्रेण अष्टन् शब्दात् परयोः जश्शसोः औशादेशः विधीयते। तत्र

अष्टाभ्यः इति पञ्चमीनिर्देशात् परस्य कार्यं विधीयते इति 'आदेः परस्य' इति सूत्रस्य प्राप्तिः। तस्मिन् प्रवृत्तौ जस्प्रत्यये जकारस्य औशादेशः स्यात्। औशादेशस्य शित्वात् 'अनेकाल्शित्सर्वस्य' इति सूत्रस्यापि प्राप्तिः। तत्प्रवृत्तौ जस् प्रत्ययस्य सर्वस्य स्थाने औशादेशः स्यात्। तत्र किं कर्तव्यम् इति चेत् - अपवादयोरनयोः 'विप्रतिषेधे परं कार्यम्' इति सूत्रेण परः सर्वादेशः एव भवति - अष्टौ इति रूपम्।

## १३. स्वरितेनाधिकारः। (१-३-११)

स्वरितेन अधिकारः इति पदच्छेदः। स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यमिति सूत्रार्थः।

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः। प. ३९.

परात् नित्यं बलवत्, परात्, नित्यात् च अन्तरङ्गं बलवत्, परात् नित्यात् अन्तरङ्गात् च अपवादसूत्रं बलवत्।

पूर्वापेक्षया परस्य प्राबल्ये हेतुः 'विप्रतिषेधे परं कार्यम्' इति सूत्रम्। नित्यत्वं च कृताकृतप्रसङ्गित्वम्। द्वयोः सूत्रयोः युगपत्प्राप्तयोः एकस्मिन् सूत्रे प्रवृत्तेऽप्रवृत्ते च अपरस्य सूत्रस्य प्राप्तिः अस्ति तर्हि तत् सूत्रं नित्यम्। अन्तरङ्गस्य प्राबल्ये हेतुः 'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ५१) इति परिभाषा। अन्तरङ्गे सूत्रे कर्तव्ये बहिरङ्गम् असिद्धमिति तस्य अर्थः। असिद्धत्वं नाम अभाववत् भावः। (अन्तर्भूतनिमित्तम् अन्तरङ्गम्, बहिर्भूतनिमित्तं बहिरङ्गम्) अपवादस्य प्राबल्ये हेतुः तस्य अनवकाशत्वम्। यदि उत्सर्गसूत्रं सर्वत्र प्रवर्तते तर्हि अपवादसूत्रं निरवकाशं स्यात्। अतः तस्य प्राबल्यम्।

अकृतव्यूहाः पाणिनीयाः। प. ५७

ऊहः प्रकृतिप्रत्ययविभागः। विशिष्टः ऊहः व्यूहः। प्रकृतिप्रत्ययविवेचनमित्यर्थः। अकृतः व्यूहः यैः ते अकृतव्यूहाः, प्रकृतिप्रत्ययविवेचनरहिताः इत्यर्थः। पाणिनीयाः पाणिनिशिष्याः। एवं तर्हि व्याकरणशास्त्रं व्यर्थं स्यात्। अतः निमित्तं विनाशोन्मुखं दृष्ट्वा इति अध्याहृत्य इयं परिभाषा व्याख्यायते। एवं च निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं वैयाकरणाः न कुर्वन्ति इत्यर्थः।

सेन्दिवान् सेन्दिवांसौ इत्यादौ वसु प्रत्ययस्य इडागमः भवति। द्वितीयाबहुवचने तु सेदुषः इत्यत्र इडागमः न भवति। तत्र द्वितीयाबहुवचने 'वसोः सम्प्रसारणम्' इति सूत्रेण वकारस्य सम्प्रसारणम् उकारः भवति। संप्रसारणे कृते बलादित्वं न स्यात् इत्यारोप्य पूर्वमेव वैयाकरणाः तत्र इडागमं न कुर्वन्ति इत्यर्थः।

- - - - -

# MODULE - II

## अथाच्सन्धिप्रकरणम्

### १. इको यणचि। (६-१-७७)

इकः यण् अचि इति पदच्छेदः। इकः इति षष्ठ्यन्तं पदम्। इक् प्रत्याहारेण इ उ ऋ लृ एते वर्णाः गृह्यन्ते। अचीति सप्तम्यन्तं पदम्। अचि परे इत्यर्थः। 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रेण वर्णान्तरेण अव्यवहितस्य पूर्वस्यैव आदेशः स्यात्। एवं च इकः स्थाने यण् स्यात् अचि संहितायां विषये इति सूत्रार्थः।

यथा - सुधी उपास्यः इत्यत्र संहितायाः नित्यत्वात् ईकारस्य उकारे परे अनेन सूत्रेण यणादेशः। 'स्थानेऽन्तरतमः' इति सूत्रेण स्थानसाम्यात् ईकारस्य यकारादेशः। एवं सुध्य् उपास्यः इति रूपं जायते।

### २. अनचि च। (८-४-४७)

अनचि च इति द्विपदं सूत्रम्। न अच् अनच्, तस्मिन् अनचि। 'अचोरहाभ्यां द्वे' इति सूत्रात् 'अचः' इति 'द्वे' इति च अनुवर्तेते। 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् 'यरः' इति 'वा' इति च अनुवर्तेते। अनचि इत्यस्य अचि परे न भवति इत्यर्थः। एवं च अचः परस्य यरो द्वे वा स्तः, न त्वचि इति सूत्रार्थः।

यथा - सुध्य् उपास्यः इत्यत्र उकारात् (अचः) परस्य धकारस्य (यरः) अनेन सूत्रेण विकल्पेन द्वित्वे सु ध् ध् य् उपास्यः इति रूपम्।

द्वित्वाभावपक्षे तु सु ध् य् उपास्यः इति च रूपम्।

### ३. स्थानिवदादेशोऽनल्विधौ। (१-१-५६)

स्थानिवत् आदेशः अनल्विधौ इति पदच्छेदः। स्थानिना तुल्यं स्थानिवत्। अलाश्रयः विधिः अल्विधिः, न अल्विधिः अनल्विधिः, तस्मिन् अनल्विधौ। एवं च आदेशः स्थानिवत्स्यात्, न तु स्थान्यलाश्रयविधौ इति सूत्रार्थः।

एवं च अनचि च इति द्वित्वे अच् आश्रीयते। अतः अचाश्रयः विधिः। अतः तस्मिन् कर्तव्ये स्थानिवद्भावः नास्ति। अतः यकारः एव परः। द्वित्वं च भवति।

यथा - सुध्य् इत्यत्र ईकारस्थानिकस्य यकारस्य स्थानिवद्भावेन अच्कार्यकारित्वमाश्रित्य अचि न द्वित्वमित्यर्थकेन 'अनचि च' इति सूत्रेण धकारस्य द्वित्वनिषेधो न शङ्कनीयः, अनल्विधौ इति स्थानिवत्त्वनिषेधात् इत्यर्थः।

## ४. अचः परस्मिन्पूर्वविधौ। (१-. १. ५७)

अचः परस्मिन् पूर्वविधौ इति पदच्छेदः। 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रात् स्थानिवदादेशः इत्यनुवर्तते। अचः इति आदेशः इत्यस्य विशेषणम्। परस्मिन् इति निमित्तसप्तमी। परनिमित्तकः आदेशः इति। पूर्वस्य विधिः पूर्वविधिः, तस्मिन् पूर्वविधौ। पूर्वस्य कार्ये कर्तव्ये इत्यर्थः। कस्मात्पूर्वस्य इत्याकाङ्क्षायां स्थानिनः पूर्वस्य इत्युच्यते। आदेशे कृते तत्र स्थानी नास्ति। अतः स्थानिभूताद् पूर्वस्य इत्यर्थः आश्रीयते। एवं च परनिमित्तकः अचः आदेशः स्थानिवत्स्यात्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य कार्ये कर्तव्ये इति सूत्रार्थः।

इको यणचि इत्यादेशः परनिमित्तकः अचः आदेशः। तस्मात्पूर्वत्वेन दृष्टः वर्णः धकारः। तस्य द्वित्वे कर्तव्ये यणादेशः स्थानिवत्स्यात् इति दोषः (इत्यायातम्)।

## ५. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। (१-१-५८)

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घश्चर्विधिषु इति द्विपदं सूत्रम्। पदान्तश्च, द्विर्वचनं च, वरे च, यलोपश्च, स्वरश्च, सवर्णश्च, अनुस्वारश्च, दीर्घश्च, जश्च, चर्च इति द्वन्द्वः। विधिशब्दः प्रत्येकमन्वेति। पदान्तविधौ द्विर्वचनविधौ इत्यादि। 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रात् स्थानिवदादेशः इति, 'अचः परस्मिन्पूर्वविधौ' इति सूत्रात् अचः इति परस्मिन् इति च अनुवर्तन्ते। एवं च पदस्य चरमावयवो द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् इति सूत्रार्थः।

## ६. झलां जश् झशि। (८-४-५३)

झलां जश् झशि इति त्रिपदं सूत्रम्। एवञ्च झलां स्थाने जश् स्यात् झशि परे इति सूत्रार्थः।

यथा - सु ध् ध् य् उपास्यः इति स्थिते द्वितीयधकारे परे (झश्) पूर्वधकारस्य (झल्) स्थाने दकारः (जश्) आदेशः स्यात्। एवं सुद् ध् य् उपास्यः इति रूपम्।

द्वित्वाभावपक्षे तु सुध् य् उपास्यः इति रूपम्।

## ७. अदर्शनं लोपः। (१-१-६०)

अदर्शनं लोपः इति द्विपदं सूत्रम्। दर्शनस्याभावः अदर्शनम्। एवं च प्रसक्तस्यादर्शनं लोपसंज्ञं स्यादिति सूत्रार्थः। एतत्तु लोपसंज्ञाविधायकं सूत्रं भवति।

## ८. संयोगान्तस्य लोपः। (८-२-२३)

संयोगान्तस्य लोपः इति द्विपदं सूत्रम्। संयोगौ अन्ते यस्य तत् संयोगान्तं, तस्य संयोगान्तस्य इति विग्रहः। पदस्य इति अधिकारः। संयोगान्तस्य इति तस्य विशेषणम्। संयोगान्तस्य पदस्य इत्यर्थः।

'अलोऽन्त्यस्य' इति परिभाषासूत्रेण अन्त्यस्य इति सिद्ध्यति। एवं च संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् इति सूत्रार्थः।

यथा - सु द् ध् य् उपास्यः इति स्थिते अनेन सूत्रेण यकारस्य लोपे प्राप्तेः 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन लोपः निषिध्यते। एवं सु द् ध् य् उपास्यः - सुद्ध्युपास्यः इति रूपम्।

'यणो मयो द्वे वाच्ये' इति वार्तिके 'मयः इति पञ्चमी । यणः इति षष्ठी' इति पक्षे यकारस्यापि द्वित्वम्। तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि।

१. एकधमेकयम् - एको धकारो यस्य तद् एकधम्। एको यकारो यस्य तद् एकयम्।

धकारयकारयोरुभयोरपि द्वित्वाभावे एकधकारमेकयकारं च प्रथमं रूपमित्यर्थः।

यथा - सुध्युपास्यः।

२. द्विधं द्वियम् - द्वौ धकारौ यस्य तद् द्विधम्। द्वौ यकारौ यस्य तद् द्वियम्। धकारयकारयोरुभयोरपि द्वित्वे द्वियकारं द्विधकारं च द्वितीयं रूपम्।

यथा - सुद्ध्य्युपास्यः।

३. द्विधमेकयम् - धकारस्य द्वित्वे यकारस्य द्वित्वाभावे द्विधमेकयं च तृतीयं रूपम्।

यथा - सुद्ध्युपास्यः।

४. एकधं द्वियम् - धकारस्य द्वित्वाभावे यकारस्य द्वित्वे एकधं द्वियं च चतुर्थं रूपम्।

यथा - सुध्य्युपास्यः।

एवम् - मधु अरिः, मध् व् अरिः, मध् ध् व् अरिः, मद् ध् व् अरिः - मद्ध्वरिः।

धातृ अंशः, धात् र् अंशः, धात् त् र् अंशः - धात्त्रंश।

लृ आकृतिः, ल् आकृतिः - लाकृतिः।

## ९. नादिन्याक्रोशे पुत्रस्य। (८-४-४८)

न आदिनी आक्रोशे पुत्रस्य इति पदच्छेदः। 'अचो रहाभ्यां द्वे' इति सूत्रात् द्वे इति 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् यरः इति च अनुवर्तेते। आक्रोशः निन्दा। एवं च पुत्रशब्दस्य न द्वे स्तः आदिनीशब्दे परे आक्रोशे गम्यमाने इति सूत्रार्थः।

यथा - पुत्रादिनी त्वमसि पापे।

हे पापे! त्वं पुत्रघातिनीत्यर्थः। अत्र आक्रोशमेव भवति। अतः उकारात् परस्य तकारस्य 'अनचि च' इति सूत्रेण प्राप्ते द्वित्वं निषिध्यते।

आक्रोशे किम्?

तत्त्वकथने द्विर्वचनं भवत्येव।

यथा - पुत्त्रादिनी सर्पिणी।

अत्र सर्पिणीति तत्त्वकथनात् आक्रोशाभावात् 'अनचि च' इति सूत्रेण उकारात् परस्य तकारस्य द्वित्वं भवति।

**(वा) तत्परे च। (वा - ५०२१)**

तत् - पुत्रशब्दः। आदिनीशब्दपरके पुत्रशब्दे च परे पुत्रशब्दावयवस्य यरो न द्वित्वमित्यर्थः।

यथा - पुत्रपुत्रादिनी त्वमसि पापे।

अत्र पूर्वस्य पुत्रशब्दस्य आदिनीशब्दः परो न भवति, द्वितीयपुत्रशब्देन व्यवधानात्। अतः पूर्वसूत्रेण अप्राप्तः द्वित्वनिषेधः अनेन वार्तिकेन संभवति।

**(वा) वा हतजग्धयोः। (वा - ५०२२)**

हतजग्धयोः परयोः पुत्रशब्दस्य द्वित्वं वा स्यात्।

यथा - पुत्त्रहती - पुत्रहती।

पुत्त्रजग्धी - पुत्रजग्धी।

**१०. त्रिप्रभृतिषु शाकटायनस्य। (८-४-५०)**

त्रिप्रभृतिषु शाकटायनस्य इति द्विपदं सूत्रम्। 'अचो रहाभ्यां द्वे' इति सूत्रात् 'अचः' इति 'द्वे' इति 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् 'यरः' इति च अनुवर्तन्ते। एवं च त्रिचतुरादिषु वर्णेषु संयुक्तेषु अचः परस्य यरः द्वित्वं वा स्यादिति सूत्रार्थः।

यथा - इन्न्द्रः - इन्द्रः।

राष्ष्ट्रम् - राष्ट्रम्।

**११. सर्वत्र शाकल्यस्य। (८-४-५१)**

सर्वत्र शाकल्यस्य इति द्विपदं सूत्रम्। 'अचो रहाभ्यां द्वे' इति सूत्रात् 'अचः' इति 'द्वे' इति 'नादिन्याक्रोशे पुत्रस्य' इति सूत्रात् 'न' इति 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् 'यरः' इति च अनुवर्तन्ते। एवं च यत्र यत्र द्वित्वं विहितं तत्र तत्र शाकल्यस्य ऋषेर्मते द्वित्वं न भवतीति सूत्रार्थः।

यथा - अर्कः, ब्रह्मा।

अत्र अचः परस्य यरः शाकल्यमते 'सर्वत्र शाकल्यस्य' इति सूत्रेण न द्वित्वम्।

## १२. दीर्घादाचार्याणाम्। (८-४-५२)

दीर्घात् आचार्याणाम् इति पदच्छेदः। 'अचो रहाभ्यां द्वे' इति सूत्रात् 'द्वे' इति 'नादिन्याक्रोशे पुत्रस्य' इति सूत्रात् 'न' इति यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् 'यरः' इति च अनुवर्तन्ते। एवं च केषाञ्चिदाचार्याणां मते दीर्घात् परस्य यरः न द्वित्वम् इति सूत्रार्थः।

यथा - दात्रम्, पात्रम्।

अत्र दीर्घात् आकारात् परस्य यरः द्वित्वं न।

## १३. अचो रहाभ्यां द्वे। (८-४-४६)

अचः रहाभ्यां द्वे इति पदच्छेदः। अचः इति पञ्चमी। अचः पराभ्यामित्यर्थः। रहाभ्याम् इत्यपि पञ्चमी। रेफहकाराभ्यां परस्य इत्यर्थः। 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् यरः इत्यनुवर्तते। एवं च अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः इति सूत्रार्थः।

यथा - हरि + अनुभवः - हर्य्यनुभवः, हर्यनुभवः।

हरि + अनुभवः इति स्थिते 'इको यणचि' इति सूत्रेण इकारस्य यकारादेशे हर् य् अनुभवः इति जाते अनेन सूत्रेण रेफात् परस्य यकारस्य द्वित्वे (ह र् य् य् अनुभवः) हर्य्यनुभवः इति रूपम्। द्वित्वाभावपक्षे तु हर्यनुभवः इति रूपम्।

एवम् - नहि +अस्ति - नह्य्यस्ति, नह्यस्ति।

## १४. हलो यमां यमि लोपः। (८-४-६४)

हलः यमाम् यमि लोपः इति पदच्छेदः। हलः इति पञ्चमी। यमाम् इति षष्ठी। यमि इति सप्तमी। यमि परे इत्यर्थः। एवं च हलः परस्य यमो लोपः स्याद्वा यमि इति सूत्रार्थः।

यथा - आदित्यः।

अदितेः अपत्यम् इत्यर्थे अदितिशब्दात् 'दित्यदित्यादित्यपत्युत्तरपदात्ण्यः' इति सूत्रेण ण्य प्रत्यये अदिति य इति स्थिते 'यस्येति च' इति सूत्रेण इकारलोपे अदित् य इति जाते 'तद्धितेष्वचामादेः' इति सूत्रेण आदिवृद्धौ आदित्यः इति रूपम्। तस्मात् 'आदित्यो देवता अस्य' इत्यर्थे 'दित्यदित्य...' इति सूत्रेणैव ण्यप्रत्ययः आदित्य य इति जाते 'यस्येति च' इति सूत्रेण अकारलोपे आदित्् य इति जाते 'हलो यमां यमि लोपः' इति सूत्रेण प्रथमयकारस्य लोपः - आदित्यः इति रूपम्।

अत्र लोपपक्षे द्वित्वाभावपक्षे च एकयं रूपं तुल्यम्। यथा - आदित्यः।

'यमां यमि' इति यथासंख्यविज्ञानात् माहात्म्यम्, तादात्म्यम् इत्यत्र अनेन सूत्रेण लोपः न।

**१५. एचोऽयवायावः। (६-१-७८)**

एचः अयवायावः इति पदच्छेदः। एचः इति षष्ठ्यन्तं पदम्। एच् प्रत्याहारेण ए ओ ऐ औ एते वर्णाः गृह्यन्ते। 'इको यणचि' इति सूत्रात् अचीति अनुवर्तते। एवं च एचः क्रमादय् अव् आय् आव् एते स्युरचि इति सूत्रार्थः।

**१६. तस्य लोपः। (१-३-९)**

तस्य लोपः इति द्विपदं सूत्रम्। तस्य इति इतः इत्यस्य विशेषणम्। एवं च तस्येतो लोपः स्यादिति सूत्रार्थः। अत्र यवयोः इत्संज्ञा न। अतः उच्चारणसामर्थ्यात् यवयोः लोपः न शङ्कनीयः इत्यर्थः।

यथा - हरे + ए - हरये।

हरे+ ए इति स्थिते 'एचोऽयवायावः' इति सूत्रेण एकारे परे (अचि) एकारस्य क्रमात् अयादेशे हरय् ए - हरये इति रूपम्।

एवम् - विष्णो+ ए - विष्णवे।

नै + अकः नायकः ।

पौ+अकः - पावकः।

**१७. वान्तो यि प्रत्यये। (६-१-७९)**

वान्तः यि प्रत्यये इति त्रिपदं सूत्रम्। व् (वकारः) अन्ते यस्य सः वान्तः। 'एचोऽयवायावः' इति सूत्रोपात्तौ अवावौ वान्तः इत्यनेन गृह्येते। यि इति सप्तम्यन्तं, प्रत्यये इति च। यि इति प्रत्यये इत्यस्य विशेषणम्। यकारादौ प्रत्यये परे इत्यर्थः। एवं च यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः इति सूत्रार्थः।

यथा - गो + यत् - गव्यम्।

'गोपयसोर्यत्' इति सूत्रेण गोः विकारः इत्यर्थे गो शब्दात् यत् प्रत्यये तकारस्य इत्संज्ञायां लोपे गो य इति स्थिते यत् प्रत्यये परे अनेन सूत्रेण ओकारस्य अवादेशे ग् अव् य, विभक्तिकार्ये गव्यम् इति रूपम्।

एवम् - नावा तार्यम् इत्यर्थे नौ शब्दात् 'नौवयोर्धर्म' इति सूत्रेण यत् प्रत्यये परे अनेन सूत्रेण ओकारस्य अवादेशे न् आव् य, विभक्तिकार्ये नाव्यम् इति रूपम्।

**(वा) गोर्यूतौ छन्दस्युपसंख्यानम्। (वा. ३५४३)**

छन्दसि यूति शब्दे परे गो शब्दस्य ओकारस्य स्थाने अव् इति वान्तादेशो भवतीति उपसंख्यानम्।

गव्यम्, गव्यूतिः इत्यादौ वकारात् यकारे परे (अश्) 'लोपः शाकल्यस्य' इति सूत्रेण वकारलोपः

प्राप्तः। सः लोपः कथं न भवति इति अत्र प्रतिपाद्यते। वान्तो यि इत्यत्र वकारात्पूर्वम् अथवा गोर्यूतौ छन्दसि इत्यत्र छकारात्पूर्वं वा एकः वकारः अस्ति इति मन्यते। तस्य च 'लोपो व्योर्वलि' इति सूत्रेण लोपः। लुप्तेऽपि तस्य वकारस्य वान्तविशेषणत्वात् वकारान्तः वान्तादेशः इत्यर्थः सिद्ध्यति। वान्तादेशस्य स्वभावतः एव वकारान्तत्वात् पुनः वकारान्त इति विशेषणस्य इदं प्रयोजनम्। श्रूयमाणः वकारान्तः एव अवादेशः। तेन च वकारः न लुप्यते।

यथा - आनो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्।

**(वा) अध्वपरिमाणे च।(वा - ३५४४)**

मार्गपरिमाणविशेषे गम्येऽपि लोके यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य अव् इति वान्तादेशस्य उपसंख्यानम्।

यथा - गो + यूतिः - गव्यूतिः।

गो + यूतिः इति स्थिते गो शब्दात् यूति शब्दे परे मार्गपरिमाणेऽर्थे गम्यमाने (गव्यूतिः स्त्रीक्रोशयुगम्) 'अध्वपरिमाणे च' इति वार्तिकेन ओकारस्य अवादेशे ग् अव् यूतिः - गव्यूतिः इति रूपम्।

**१८. धातोस्तन्निमित्तस्यैव। (६-१-८०)**

धातोः तन्निमित्तस्य एव इति पदच्छेदः। 'वान्तो यि प्रत्यये' इति सूत्रमनुवर्तते, 'एचोऽयवायावः' इति सूत्रात् एचः इति च। तन्निमित्तस्यैव इत्यनेन यकारादिप्रत्ययस्यैव इत्यर्थः। एवं च यादौ प्रत्यये परे धातोरेचश्चेत् वान्तादेशस्तर्हि तन्निमित्तस्यैव स्यादिति सूत्रार्थः।

यथा - लू + य - लव्यम्।

लूञ् धातोः कर्मणि यत् प्रत्ययः। लू + य इति स्थिते यत्प्रत्ययमाश्रित्य 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणः ओकारः लो य। तत्र धात्ववयवः ओकारः। स च यत्प्रत्ययनिमित्तकः। अतः तत्र 'वान्तो यि प्रत्यये' इति सूत्रेण अवादेशः भवति, लव्यम् इति रूपम्।

एवम् - अवश्यलाव्यम्।

अवश्यलाव्यमित्यत्र लूञ् धातोः 'ओरावश्यके' इति सूत्रेण ण्यत् प्रत्यये अवश्य लू य इति स्थिते 'अचो ञ्णिति' इति सूत्रेण ऊकारस्य वृद्धिः औकारः - अवश्य लौ य। अत्र धातोरवयवः औकारः। सः ण्यत्प्रत्ययनिमित्तकः। अतः अत्र 'वान्तो यि प्रत्यये' इति सूत्रेण औकारस्य आवादेशे अवश्यलाव्यम् इति रूपम्।

तन्निमित्तस्यैव इति किम्? तस्य प्रयोजनं किमित्यर्थः।

तन्निमित्तस्यैव इति वचनात् ओयते (लट्) औयत (लङ्) इत्यादौ वान्तादेशो न भवति। आ ऊयते इति स्थिते 'आद्गुणः' इति सूत्रेण गुणे ओयते इति रूपम्। अत्र ओकारः न यकारादिप्रत्ययनिमित्तकः। अतः तत्र अवादेशो न।

एवम् - औयत।

आ ऊयत इति स्थिते 'आटश्च' इति सूत्रेण वृद्धिः - औयत इति। अत्र औकारः न यत्प्रत्ययनिमित्तकः। अतः अवादेशो न।

## १९. क्षय्यजय्यौ शक्यार्थे। (६-१-८१)

क्षय्यजय्यौ शक्यार्थे इति द्विपदं सूत्रम्। शक्यार्थे क्षय्यजय्यशब्दौ वाचकतया वर्तते इत्यर्थः। शक्यार्थके यादौ प्रत्यये परे 'क्षि क्षये' 'जि जये' इति धातोरेचः अय् इति यान्तादेशनिपातनार्थमिदम् सूत्रम्।

यथा - क्षि + यत् - क्षय्यम्।

क्षि धातोः क्षेतुं शक्यम् इत्यर्थे 'अचो यत्' इति सूत्रेण यत् प्रत्यये क्षि य इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे क्षे य इति जाते अस्मिन् सूत्रे निपातनात् एकारस्य अयादेशे क्षय्यम् इति रूपम्।

शक्यार्थे इति किम्?

क्षेतुं योग्यं इत्यत्र तु शक्यार्थकः न, अतः अत्र यान्तादेशोऽपि न इत्यर्थः। क्षि य इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे क्षेयम् इति रूपम्। क्षेयं पापम्।

एवम् - जेयं मनः।

## २०. क्रय्यस्तदर्थे। (६-१-८२)

क्रय्यः तदर्थे इति पदच्छेदः। तस्मै इदम् तदर्थम्। तस्मै प्रकृत्यर्थाय इदं तदर्थम्। इदं सूत्रं यान्तादेशनिपातनार्थं भवति।

यथा - क्री + यत् क्रय्यम्।

क्रीञ् धातोः कर्मणि 'अचो यत्' इति सूत्रेण यत्प्रत्यये परे क्री य इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे एकारे क्रे य इति जाते अनेन सूत्रेण क्रयार्थे एकारस्य अयादेशे क्रय्यम् इति रूपम्। क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितम् इत्यर्थः।

तदर्थमिति किम्?

योग्यतामात्रग्रहणे तु तदर्थे इत्यव्यावर्तकं स्यादिति भावः। अतः अत्र यान्तादेशोऽपि न क्रेयम् इति रूपम्। क्रयणार्हमित्यर्थः। अत्र 'अर्हे कृत्यतृचश्च' इति सूत्रेण यत् क्री य इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे क्रे य - क्रेयम् इति रूपम्।

## २१. लोपः शाकल्यस्य। (८-३-१९)

लोपः शाकल्यस्य इति द्विपदं सूत्रम्। शाकल्यः पाणिनेः पूर्वाचार्यः। 'भो भगो अघोऽपूर्वस्य योऽशि' इति सूत्रात् अपूर्वस्य इति अशि इति च, 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' इति सूत्रात् व्योः इति च अनुवर्तेते। अपूर्वस्य इति द्विवचनान्तत्वेन विपरिणम्यते। पदस्य इति अधिक्रियते। तत्रापि द्विवचनन्तत्वेन विपरिणामः। पदान्तयोः इत्यर्थः। एवं च अवर्णपूर्वयोः पदान्तयोः यवयोः वा लोपोऽशि परे इति सूत्रार्थः।

यथा - हरे + एहि - हर एहि - हरयेहि।

हरे + एहि इत्यत्र अचि परे 'एचोऽयवायावः' इति सूत्रेण अयादेशे हरय् एहि इति स्थिते 'लोपः शाकल्यस्य' इति सूत्रेण यकारस्य विकल्पेन लोपे हर एहि इति रूपम्। अत्र 'वृद्धिरेचि' इति सूत्रेण वृद्ध्यां प्राप्ते 'पूर्वत्रासिद्धम्' इति सूत्रेण लोपस्यासिद्धत्वात् वृद्धिः न। लोपाभावपक्षे तु हरयेहि इति रूपम्।

एवम् - विष्णो + इह - विष्ण इह, विष्णविह ।

विष्णव् इह - एचोऽयवायावः।

विष्ण इह - लोपः शाकल्यस्य।

अत्र 'आद्गुणः' इति सूत्रेण गुणो न।

लोपाभावपक्षे - विष्णविह।

श्रियै + उद्यतः -श्रिय उद्यतः, श्रियायुद्यतः ।

श्रियाय् उद्यतः - एचोऽयवायावः।

श्रिय उद्यतः - लोपः शाकल्यस्य।

अत्र गुणो न।

श्रियायुद्यतः - लोपाभावे भवति।

गुरौ +उत्कः - गुरा उत्कः, गुरावुत्कः ।

गुराव् उत्कः - एचोऽयवायावः।

गुरा उत्कः - लोपः शाकल्यस्य।

अत्र गुणो न।

लोपाभावे - गुरावुत्कः।

सन्ति - अस् धातोः लट् प्र. पु. बहु.

अस झि इति स्थिते झोऽन्तः इति सूत्रेण झकारस्य अन्तादेशे असन्ति इति जाते 'उनसोरल्लोपः'

इति धातोरकारस्य लोपे सन्ति इति रूपम्। पश्चात् कानि इत्यनेन योगे

(कानि सन्ति) इकारस्य 'इको यणचि' इति सूत्रेण यणादेशे कर्तव्ये 'अचः परस्मिन्पूर्वविधौ' इति सूत्रेण अकारलोपस्य यदि स्थानिवद्भावः स्यात्तर्हि यणादेशः स्यात्। किन्तु इकारस्य यणादेशः पदान्तविधिः। तस्मिन् कर्तव्ये 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घ-जश्चर्विधिषु' इति सूत्रेण निषेधात् स्थानिवद्भावो न भवति। यणादेशोऽपि न।

**२२. एकः पूर्वपरयोः। (६-१-८४)**

एकः पूर्वपरयोः इति द्विपदं सूत्रम्। पूर्वपरयोः एकः आदेशः स्यादिति सूत्रार्थः।

**२३. आद्गुणः। (६-१-८७)**

आत् गुणः इति पदच्छेदः। आत् इत्यनेन अवर्णात् इत्यर्थः। 'अदेङ् गुणः' इति सूत्रेण अ ए ओ एतेषां गुणसंज्ञा विधीयते। एवं च अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्संहितायाम् इति सूत्रार्थः।

यथा - उप + इन्द्रः - उपेन्द्रः।

उप + इन्द्रः इति स्थिते आद्गुणः इति सूत्रेण अकारस्य (कण्ठः) इकारस्य (तालु) च स्थाने स्थानसाम्यात् एकारः (कण्ठतालु) इति गुणादेशेन उपेन्द्रः इति रूपम्।

एवम् -

रमा + ईशः - रमेशः।

गङ्गा + उदकम् - गङ्गोदकम्।

**२४. उरण् रपरः। (१-१-५१)**

उः अण् रपरः इति पदच्छेदः। उः इति ऋकारस्य षष्ठी। ऋलृवर्णयोर्मिथः सावर्ण्यात् ऋ इति त्रिंशतः संज्ञा। तत्स्थाने इत्यर्थः। अण् इति पूर्वणकारेण प्रत्याहारः। रः परः यस्मात् सः रपरः। र इति प्रत्याहारः। तेन च रेफलकारयोर्ग्रहणम्। एवं च ऋकारलृकारयोः स्थाने विधीयमानोऽण् क्रमेण रपरः लपरश्च प्रवर्तते इति सूत्रार्थः।

यथा - कृष्ण + ऋद्धिः - कृष्णर्द्धिः।

कृष्ण + ऋद्धिः इति स्थिते पूर्वपरयोः अकार - ऋकारयोः स्थाने 'आद्गुणः' इति सूत्रेण गुणे अकारैकादेशे कृष्ण् अ द्धिः इति जाते सः अकारः 'उरण् रपरः' इति सूत्रेण रपरो भवति। एवं कृष्ण् अर् द्धिः - कृष्णर्द्धिः इति रूपम्।

एवम् - तव + लृकारः - तवल्कारः। तव् अ कारः, तव् अल् कारः - तवल्कारः।

## २५. झरो झरि सवर्णे। (८-४-६५)

झरः झरि सवर्णे इति त्रिपदं सूत्रम्। 'झयो होऽन्यतरस्याम्' इति सूत्रात् अन्यतरस्याम् इत्यनुवर्तते। 'हलो यमां यमि लोपः' इति सूत्रात् हलः इति, लोपः इति च। एवं च हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि इति सूत्रार्थः।

१. कृष्णर् द्धिः इति स्थिते रेफात् परस्य धकारस्य (यर्) 'अचो रहाभ्यां द्वे' इति सूत्रेण द्वित्वे, 'झरो झरि सवर्णे' इति सूत्रेण लोपाभावे च कृष्णर् द् द्धिः - कृष्णर्द्द्धिः इति रूपम्।

२. कृष्णर् द्धिः इति स्थिते रेफात् परस्य धकारस्य 'अचो रहाभ्यां द्वे' इति सूत्रेण द्वित्वाभावे, 'झरो झरि सवर्णे' इति सूत्रेण लोपे च कृष्णर् धिः - कृष्णर्धिः इति रूपम्।

३. कृष्णर् द्धिः इति स्थिते रेफात् परस्य धकारस्य 'अचो रहाभ्यां द्वे' इति सूत्रेण द्वित्वाभावे, 'झरो झरि सवर्णे' इति सूत्रेण लोपाभावे च कृष्णर् द्धिः - कृष्णर्द्धिः इति रूपम्।

४. कृष्णर् द्धिः इति स्थिते रेफात् परस्य धकारस्य 'अचो रहाभ्यां द्वे' इति सूत्रेण द्वित्वे, 'झरो झरि सवर्णे' इति सूत्रेण लोपे च कृष्णर् द्धिः - कृष्णर्द्धिः इति रूपम्।

द्वित्वे लोपे च सति असति च एकैव रूपं भवति - कृष्णर्द्धिः।

१. तवल् कारः इति स्थिते 'अनचि च' इति सूत्रेण अकारात् परस्य लकारस्य द्वित्वे, 'यणो मयो द्वे वाच्ये' इति वार्तिकेन लकारात् परस्य ककारस्य द्वित्वाभावे च तवल् ल् कारः - तवल्ल्कारः इति द्विलकारमेकककारं च प्रथमं रूपम्।

२. तवल् कारः इति स्थिते 'यणो मयो द्वे वाच्ये' इति वार्तिकेन लकारात् परस्य ककारस्य द्वित्वे, 'अनचि च' इति सूत्रेण अकारात् परस्य लकारस्य द्वित्वाभावे च तवल् क् कारः - तवल्क्कारः इति द्विककारमेकलकारं च द्वितीयं रूपम्।

३. तवल् कारः इति स्थिते 'अनचि च' इति सूत्रेण अकारात् परस्य लकारस्य द्वित्वाभावे, 'यणो मयो द्वे वाच्ये' इति वार्तिकेन लकारात् परस्य ककारस्य द्वित्वाभावे च तवल् कारः - तवल्कारः इति एकलकारमेकककारं च तृतीयं रूपम्।

४. तवल् कारः इति स्थिते 'अनचि च' इति सूत्रेण अकारात् परस्य लकारस्य द्वित्वे, 'यणो मयो द्वे वाच्ये' इति वार्तिकेन लकारात् परस्य ककारस्य द्वित्वे च तवल् ल् क् कारः - तवल्ल्क्कारः इति द्विलकारं द्विककारं च चतुर्थं रूपम्।

द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि।
तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम्।।

## २६. वृद्धिरेचि। (६-१-८८)

वृद्धिः एचि इति पदच्छेदः। 'आद् गुणः' इति सूत्रात् आत् इत्यनुवर्तते। 'एकः पूर्वपरयोः' इति सूत्रमनुवर्तते (सूत्रमधिकृतम्)। एचि इति सप्तम्यन्तम्। एचि परे इत्यर्थः। एच् इत्यनेन ए ओ ऐ औ एते वर्णाः गृह्यन्ते। एवं च आदेचि परे वृद्धिरेकादेशः स्यादिति सूत्रार्थः। एतत् सूत्रं गुणापवादः भवति।

यथा - कृष्ण + एकत्वम् - कृष्णैकत्वम् ।

कृष्ण + एकत्वम् इति स्थिते 'वृद्धिरेचि' इति सूत्रेण पूर्वपरयोः अकारैकारयोः स्थाने वृद्धिः ऐकारैकादेशे कृष्ण् ऐ कत्वम् - कृष्णैकत्वम् इति रूपम्।

एवम् - गङ्गा + ओघः - गङ्गौघः।

देव + ऐश्वर्यम् - देवैश्वर्यम्।

कृष्ण + औत्कण्ठ्यम् - कृष्णौत्कण्ठ्यम्।

## २७. एत्येधत्यूठ्सु। (६-१-८९)

एत्येधत्यूठ्सु इति एकपदं सूत्रम्। 'आद्गुणः' इति सूत्रात् 'आत्' इति, 'वृद्धिरेचि' इति सूत्रात् 'एचि' इति च अनुवर्तेते। एतिश्च एधतिश्च ऊठ् च एत्येधत्यूठः, तेषु एत्येधत्यूठ्सु इति विग्रहः। एतिरित्यनेन इण् धातोः, एधतिरित्यनेन एध्धातोः, ऊठ् इत्यनेन ऊठादेशस्य च ग्रहणम्। एचीति एत्येधत्योर्विशेषणम्, न तु ऊठः, असंभवात्। एवं च अवर्णात् एजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यादिति सूत्रार्थः। एतत् सूत्रं पररूपगुणापवादः।

यथा - उप + एति - उपैति।

उप + एति इति स्थिते अवर्णात् एजादौ इण्धातौ परे पूर्वपरयोः अकारैकारयोः स्थाने 'एत्येधत्यूठ्सु' इति सूत्रेण ऐकारैकादेशे उप् ऐ ति उपैति इति रूपम्।

एवम् - उप + एधते - उपैधते - अवर्णात् एजादौ एध् धातौ परे।

प्रष्ठ + ऊहः - प्रष्ठौहः - अवर्णात् ऊठि परे।

एजाद्योः इति किम्?

इण् धातोः एध् धातोश्च एजादित्वाभावात् तस्मिन् परतो न वृद्धिः।

यथा - उप + इतः - उपेतः।

उप + इतः इति स्थिते इण् धातुरस्ति। किन्तु तस्य एजादित्वं नास्ति। अतः वृद्धिरपि न भवति। एवं जाते 'आद्गुणः' इति सूत्रेण गुणे एकारे उपेतः इति रूपम्।

+ इदिधत् - प्रेदिधत्।

एध् धातोः णिजन्तात् लुङ् प्र. पु., ए. व.।

'परस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान् इति परिभाषासूत्रेण अव्यवहितान् एव उत्तरान् विधीन् बाधन्ते, न तु व्यवहितानित्यर्थः। अतः 'एत्येधत्यूठ्सु' इति सूत्रेण प्राप्ता वृद्धिः 'एङि पररूपम्' इत्यस्यैव बाधिका, न तु 'ओमाङोश्च' इति सूत्रस्य।

**(वा) अक्षादूहिन्यामुपसंख्यानम्। (वा. ३६०४)**

अक्षशब्दात् ऊहिनीशब्दे परे पूर्वपरयोरचो वृद्धिरेकादेशः भवति इति वक्तव्यम्।

+ ऊहिनी - अक्षौहिणी।

अक्ष + ऊहिनी इति स्थिते ऊहिनीशब्दे परे 'अक्षादूहिन्यामुपसंख्यानम्' इति वार्तिकेन पूर्वपरयोः अकार - ऊकारयोः स्थाने औकारः इति वृद्धिरेकादेशे अक्ष औहिनी इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण णत्वे अक्षौहिणी इति रूपम्।

**(वा) स्वादीरेरिणोः। (वा. ३६०६)**

स्वात् इत्यनेन स्वशब्दात् इत्यर्थः। स्वशब्दात् ईरशब्दे ईरिन्शब्दे च परे पूर्वपरयोरचो वृद्धिरेकादेशः स्यादिति वक्तव्यम्।

यथा - स्व + ईरः - स्वैरः।

स्व + ईरः इति स्थिते ईरशब्दे परे पूर्वपरयोः अकार इकारयोः गुणे प्राप्ते 'स्वादीरेरिणोः' इति वार्तिकेन ऐकारे वृद्धिरेकादेशे स्व् ऐ रः - स्वैरः इति रूपम्। स्वेन ईरः इति विग्रहः।

एवम् - स्वैरी - स्व + ईरिन् - स्व् + ऐ + ईरि - स्वैरी।

स्वैरिणी - स्व + ईरिन्, स् ऐ ईरि। स्वेन ईरितुं शीलं अस्येत्यर्थे 'सुप्यजातौ' इति सूत्रेण णिनिः - स्वैरिणी। स्वच्छन्दचारी इत्यर्थः।

**(वा) प्रादूहोढोढ्येषैष्येषु। (वा. ३६०५)**

प्र इत्युपसर्गात् ऊह, ऊढ, ऊढि, एष, एष्य एतेषु शब्देषु परेषु पूर्वपरयोरचो वृद्धिरेकादेशः स्यादित्यर्थः।

यथा - प्र + ऊहः - प्रौहः।

प्र + ऊहः इति स्थिते ऊहशब्दे परे पूर्वपरयोः अकार-ऊकारयोः स्थाने 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन वृद्धिः - औकारैकादेशे प्रौहः इति रूपम्।

एवम् - प्र + ऊढः - प्रौढः।

प्र + ऊढिः - प्रौढिः।

प्र + एषः - प्रैषः।

प्र + एष्यः - प्रैष्यः।

**(वा) ऋते च तृतीयासमासे।(वा. ३६०७)**

तृतीयासमासे अकारात् ऋतशब्दे परे पूर्वपरयोरचोर्वृद्धिः स्यादिति वार्तिकार्थः।

यथा - सुखेन ऋतः सुखार्तः।

सुखेन ऋतः सुखार्तः इति विग्रहः। तत्र 'सुप्सुपा' इति समासे जाते सुख + ऋतः इति स्थिते 'ऋते च तृतीयासमासे' इति वार्तिकेन अकारस्य ऋकारस्य च स्थाने वृद्धिः आकारेकादेशे सुख् आ तः इति जाते 'उरण् रपरः' इति सूत्रेण रपरत्वे सुख् आर् तः - सुखार्तः इति रूपम्।

तृतीया इति किम्?

तृतीयासमासाभावे वृद्धिः न भवति।

यथा - परमर्तः।

परमश्च असौ ऋतश्च इति कर्मधारयसमासः। परम + ऋतः इति स्थिते तृतीयासमासाभावे वृद्धिरसिद्धे 'आद् गुणः' इति सूत्रेण गुणे अकारैकादेशे परम अ तः इति जाते 'उरण् रपरः' इति सूत्रेण रपरत्वे परमर्तः (परम् अर् तः) इति रूपम्।

**(वा) प्रवत्सतरकम्बलवसनदशार्णानामृणे। (वा. ३६०८९)**

प्र, वत्सतर, कम्बल, वसन, ऋण, दश एतेषाम् ऋणशब्दे परे पूर्वपरयोरचो वृद्धिरेकादेशः स्यादिति वार्तिकार्थः।

यथा - प्र + ऋणम् - प्रार्णम्।

प्र + ऋणम् इति स्थिते 'प्रवत्सतरकम्बलवसनदशार्णानामृणे' इति वार्तिकेन पूर्वपरयोः अकार ऋकारयोः च स्थाने वृद्धिराकारैकादेशे प्र् आ णम् इति जाते 'उरण् रपरः' इति सूत्रेण रपरत्वे प्रार्णम् (प्र आर् णम्) इति रूपम्।

एवम् - वत्सतर + ऋणम् - वत्सतरार्णम्।

कम्बल + ऋणम् - कम्बलार्णम्।

वसन + ऋणम् - वसनार्णम्।

ऋण + ऋणम् - ऋणार्णम्।

दश + ऋणम् - दशार्णम्।

## २८. उपसर्गादृति धातौ। (६-१-९१)

उपसर्गात् ऋति धातौ इति पदच्छेदः। 'आद् गुणः' इति सूत्रात् आदित्यनुवर्तते। 'वृद्धिरेचि' इतिसूत्रात् वृद्धिः इति च। 'एकः पूर्वपरयोः' इति सूत्रमप्यनुवर्तते। आत् इति उपसर्गादित्यस्य विशेषणम्। विशेषणं तदन्तस्य संज्ञा स्यात् - अवर्णान्तादुपसर्गात् इत्यर्थः। ऋत् इति ऋकारस्य तपरकरणम्। तस्य सप्तमी ऋति। ऋतीति धातौ इति च सप्तम्यन्तम्। विशेषणविशेष्ययोः सप्तम्यन्तत्वे तदादेः ग्रहणम् - ऋकारादौ धातौ परे इत्यर्थः। एवं च अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यादिति सूत्रार्थः।

यथा - उप + ऋच्छति - उपार्च्छति।

उप + ऋच्छति इति स्थिते 'उपसर्गाः क्रियायोगे' इति सूत्रेण उप इत्यस्य उपसर्गसंज्ञायाम् 'उपसर्गादृति धातौ' इति सूत्रेण पूर्वपरयोः अकार - ऋकारयोः स्थाने वृद्धिराकारैकादेशे उप् आ च्छति इति जाते 'उरण् रपरः' इति सूत्रेण तस्य रपरत्वे उप् आर् च्छति - उपार्च्छति इति रूपम्।

एवम् - प्र + ऋच्छति - प्रार्च्छति।

## २९. अन्तादिवच्च। (६-१-८५)

अन्तादिवत् च इति पदच्छेदः। अन्तश्च आदिश्च अन्तादी, अन्तादिभ्यां तुल्यम्। अन्तादिवत् इति विग्रहः। 'एकः पूर्वपरयोः' इति सूत्रमनुवर्तते। यथासंख्यपरिभाषया अन्तादिवत् इत्यस्य क्रमेणान्वयः। एवं च योऽयमेकादेशः सः पूर्वस्यान्तवत् परस्यादिवत् स्यादिति सूत्रार्थः।

यथा - शिव + एहि - शिवेहि।

शिव + आ + इहि इति स्थिते आ + इहि इत्यत्र 'आद्गुणः' इति सूत्रेण गुणे शिव + एहि इति जाते 'अन्तादिवच्च' इति सूत्रेण एकादेशस्य गुणस्य एकारस्य पूर्वान्तवद्भावेन आङ्त्वे 'ओमाङोश्च' इति सूत्रेण पररूप एकारैकादेशे शिव् ए हि शिवेहि इति रूपम्।

## ३०. खरवसानयोर्विसर्जनीयः। (८-३-१२)

खरवसानयोः विसर्जनीयः इति पदच्छेदः। खरवासनयोः इति सप्तमीद्विवचनम्। खर् च अवसानं च खरवसाने, तयोः खरवसानयोः इति विग्रहः। विसर्जनीय इत्यस्य विसर्गः इत्यर्थः। एवं च खरि अवसाने च परे रेपस्य विसर्जनीयः स्यात्पदान्ते इति सूत्रार्थः।

यथा - उप + ऋच्छति इति स्थिते वृद्ध्यां, रपरत्वे च उपार् च्छति इति जाते 'अन्तादिवच्च' इति सूत्रेण रेफस्य पदान्तत्वे, अनेन सूत्रेण विसर्गे प्राप्ते अन्तवद्भावेन पदान्तरेपस्य न विसर्गः इत्यादिना 'उभयथर्क्षु' (सू. ३६३०), 'कर्तरि चर्षिदेवतयोः' (सू. ३१३७) इत्यादिनिर्देशात् विसर्गो न। अत एव उपार्च्छति इत्येवं रूपम्।

## ३१. वा सुप्यापिशलेः। (६-१-९२)

वा सुपि आपिशलेः इति पदच्छेदः। आपिशलिः पाणिनेः पूर्वाचार्यः। 'उपर्गादृति धातौ' इति 'एकः पूर्वपरयोः' इति च समग्रे सूत्रे अनुवर्तेते। 'आद्गुणः' इति सूत्रात् आत् इति, 'वृद्धिरेचि' इति सूत्रात् वृद्धिः इति च अनुवर्तेते। आत् इति उपसर्गात् इत्यस्य विशेषणम्। तदन्तविधिः। एवं च अवर्णान्तादुपसर्गात् ऋकारादौ सुब्धातौ परे वृद्धिरेकादेशो वा स्यात् इति सूत्रार्थः।

यथा - प्र + ऋषभीयति - प्रार्षभीयति - प्रर्षभीयति।

ऋषभम् आत्मनः इच्छति इत्यर्थः। प्र + ऋषभीयति इति स्थिते अनेन सूत्रेण विकल्पेन वृद्ध्यां प्र् आ षभीयति इति जाते 'उरण् रपरः' इति सूत्रेण रपरत्वे प्र् आर् षभीयति - प्रार्षभीयति इति रूपम्।

वृद्ध्यभावे 'आद्गुणः' इति सूत्रेण गुणे प्र् अ षभीयति इति जाते 'उरण् रपरः' इति सूत्रेण रपरत्वे प्र् अर् षभीयति - प्रर्षभीयति इति रूपम्।

एवम् - उप + लृकारीयति - उपाल्कारीयति - उपल्कारीयति। ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति वार्तिकेन सावर्ण्यात्।

ऋतीति तपरकरणेन तत्कालस्यैव ग्रहणात् दीर्घऋकारे परे 'वा सुप्यापिशलेः' इति सूत्रेण वृद्धिविकल्पो न संभवति।

यथा - उप + ॠकारीयति - उपर्कारीयति।

उप + ॠकारीयति इति सिद्धे दीर्घऋकारे परे 'वा सुप्यापिशलेः' इति सूत्रेण वृद्ध्यसिद्धत्वात् 'आद्गुणः' इति सूत्रेण गुणे उप् अ कारीयति इति जाते 'उरण् रपरः' इति सूत्रेण रपरत्वे उप् अर् कारीयति - उपर्कारीयति इति रूपम्।

## ३२. एङि पररूपम्। (६-१-९४)

एङि पररूपम् इति द्विपदं सूत्रम्। 'आद्गुणः' इति सूत्रात् आत् इति 'उपसर्गादृति धातौ' इति सूत्रात् उपसर्गात् धातौ इति चानुवर्तन्ते। आत् इति उपसर्गादित्यस्य विशेषणम्। तदन्तविधिः अवर्णान्तादुपसर्गात् इत्यर्थः। 'एकः पूर्वपरयोः' इत्यधिकारः। एवं च अवर्णान्तादुपसर्गात् एङादौ धातौ परै पररूपमेकादेशः स्यादिति सूत्रार्थः।

यथा - प्र + एजते - प्रेजते।

प्र + एजते इति स्थिते 'उपसर्गाः क्रियायोगे' इति सूत्रेण प्र इत्यस्य उपसर्गसंज्ञा। तस्मात् एङादौ धातौ परे 'एङि पररूपम्' इति सूत्रेण अकार-एकारयोः स्थाने पररूपैकारैकादेशे प्रेजते इति रूपम्।

एवम् - उप + ओषत् - उपोषति।

अनन्तरं 'वा सुप्यापिशलेः' इति सूत्रात् वा सुपि इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। एवं द्वितीयं वाक्यं सम्पद्यते - अवर्णान्तादुपसर्गात् एङादौ सुब्धातौ परे पररूपं वा स्यादिति।

+ एडकीयति - उपेडकीयति - उपैडकीयति।

एडकम् आत्मनः इच्छतीत्यर्थः। उप + एडकीयति इति स्थिते 'उपसर्गाः क्रियायोगे' इति सूत्रेण उप इत्यस्य उपसर्गसंज्ञायां एङादौ सुब्धातौ च परे 'एङि पररूपम्' इति सूत्रेण पररूपैकादेशे उपेडकीयति इति रूपम्।

उप + एडकीयति इति स्थिते वृद्धिरेचीति सूत्रेण वृद्ध्याम् ऐकारे एकादेशे उपैडकीयतीति रूपम्।

एवम् - प्र + ओधीयति - प्रोधीयति - प्रौधीयति।

**(वा) एवे चानियोगे। (वा. ३६३१)**

अनियोगे एवशब्दे परेऽपि पररूपमेकादेशः स्यात्।

यथा - क्वेव भोक्ष्यसे।

अत्र इति न निश्चिनुम इत्यर्थः। क्व + एव इति स्थिते वृद्धिं बाधित्वा 'एवे चानियोगे' इति वार्तिकेन पररूपमेकारैकादेशे क्वेव इति रूपम्।

अनियोगे इति किम्?

यथा - तवैव।

अत्र एव शब्दस्य नियोगार्थत्वात् (अवधारणार्थत्वात्) न तस्मिन् परे पररूपम्। अतः 'वृद्धिरेचि' इति सूत्रेण वृद्ध्यां तवैव इति रूपम्।

**३३. अचोऽन्त्यादि टि। (१-१-६४)**

अचः अन्त्यादि टि इति पदच्छेदः। अचः इति निर्धारणे षष्ठी। अचां मध्ये इत्यर्थः। अन्ते भवः अन्त्यः, अन्त्यः आदिः यस्य तत् अन्त्यादीति विग्रहः। एवं च अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यादिति सूत्रार्थः। एतत् टिसंज्ञाविधायकं सूत्रं भवति।

**(वा) शकन्ध्वादिषु पररूपं वाच्यम्। (वा. ३६३२)**

शकन्ध्वादिषु विषये तत्सिद्ध्यर्थं पूर्वपरयोः पररूपं वक्तव्यम्। तच्च टेः।

यथा - शक + अन्धुः - शकन्धुः।

शकानाम् अन्धुः शकन्धुः इति विग्रहः। देशविशेषाणां कूपः इत्यर्थः। शक + अन्धुः इति स्थिते 'अचोऽन्त्यादि टि' इति सूत्रेण शक इत्यस्य अन्त्यस्याकारस्य टिसंज्ञा। एतस्य टेः अन्धुशब्दस्य अकारस्य च स्थाने 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकेन पररूपे अकारैकादेशे शकन्धुः इति रूपम्।

एवम् - + अन्धुः - कर्कन्धुः। कर्काणाम् अन्धुः, राज्ञां कूपः।

कुल + अटा - कुलटा। भिक्षार्थं व्यभिचारार्थं वा या गृहानटति सा कुलटा।

**(वा) सीमन्तः केशवेशे। (वा. ३६३३)**

केशवेशे गम्ये सीमन्शब्दस्य टेः (अन्) अन्तशब्दस्यावर्णस्य च स्थाने पररूपमित्यर्थः।

यथा - सीमन् + अन्तः इति स्थिते केशवेशेऽर्थे गम्यमाने सीमन् शब्दस्य टेः (अन् इत्यस्य) अन्तशब्दस्य अकारस्य च स्थाने अनेन वार्तिकेन पररूपैकादेशे सीम् अन्तः - सीमन्तः इति रूपम्।

अन्येऽर्थे सीम + अन्तः इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे सीमान्तः इति रूपम्। ग्रामान्तप्रदेशः इत्यर्थः।

मनस् + ईषा - मनीषा।

हल + ईषा - हलीषा।

लाङ्गल + ईषा - लाङ्गलीषा।

पतन् + अञ्जलिः - पतञ्जलिः।

**(ग. सू.) सारङ्गः पशुपक्षिणोः। (ग. सू. १३६)**

इदं गणान्तर्गतं वार्तिकम्। पशुपक्षिणोरर्थे सार शब्दस्य पररूपमेकादेशः स्यात्।

यथा - सार + अङ्गः - सारङ्गः।

सार + अङ्गः इति स्थिते 'सारङ्गः पशुपक्षिणोः' इति वार्तिकेन पररूपेकादेशे सारङ्गः इति रूपम्।

अन्येऽर्थे सार + अङ्गः इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे साराङ्गः इति रूपम्।

मार्त + अण्डः - मार्तण्डः।

मार्त + अण्डः इति स्थिते मार्त शब्दस्य टेकारस्य अण्डशब्दस्याकारस्य च स्थाने 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकेन पररूपाकारैकादेशे मार्तण्डः इति रूपम्।

**(वा) ओत्वोष्ठयोः समासे वा। (वा. ३६३४)**

समासे अवर्णात् अत्वोष्ठयोः (ओत्, ओष्ठः) परे पूर्वपरयोरचयोः पररूपं वा स्यात्।

यथा - स्थूल + ओतुः - स्थूलोतुः - स्थूलौतुः।

स्थूल + ओतुः इति स्थिते अवर्णात् ओतुशब्दे परे 'ओत्वोष्ठयोः समासे वा' इति वार्तिकेन विकल्पेन

पररूपमेकादेशे स्थूलोतुः इति रूपम्।

परररूपाभावपक्षे तु 'वृद्धिरेचि' इति सूत्रेण पूर्वपरयोरकारौकारयोः औकारैकादेशे स्थूलौतुः इति रूपम्।

एवम् - बिम्ब + ओष्ठः - बिम्बोष्ठः - बिम्बौष्ठः।

समासे इति किम्?

समासाभावे नित्यवृद्धिः।

यथा - तव + ओष्ठः - तवौष्ठः।

अत्र समासाभावे 'ओत्वोष्ठयोः समासे वा' इति वार्तिकस्यासिद्धत्वात् 'वृद्धिरेचि' इति सूत्रेण वृद्ध्यां तवौष्ठः इति रूपम्।

**३४. ओमाङोश्च। (६-१-९५)**

ओमाङोः च इति पदच्छेदः। ओम् च आङ् च ओमाङौ, तयोः ओमाङोः, सप्तम्यन्तं पदम्। 'आद्गुणः' इति सूत्रात् आदिति, 'एङि पररूपम्' इति सूत्रात् पररूपम् इति चानुवर्तेते। 'एकः पूर्वपरयोः' इत्यधिकारः। एवं च ओमि आङि च आत्परे पररूपमेकादेशः स्यादिति सूत्रार्थः।

यथा - शिवाय + ओं नमः - शिवायों नमः।

शिवाय + ओं नमः इति स्थिते अवर्णात् ओं शब्दे परे 'ओमाङोश्च' इति सूत्रेण पूर्वपरयोः अकारोंकारयोः पररूपमेकादेशे शिवायों नमः इति रूपम्।

एवम् - शिव + एहि - शिवेहि।

शिव + आ + इहि स्थिते आ + इहि इत्यत्र आद्गुणः इति सूत्रेण गुणे शिव + एहि इति जाते 'अन्तादिवच्च' इति सूत्रेण एकादेशस्य गुणस्य एकारस्य पूर्वान्तवद्भावेन आङ्त्वम्। अतः 'ओमाङोश्च' इति सूत्रेण पररूपैकारैकादेशे शिव् ए हि - शिवेहि इति रूपम्।

**३५. अव्यक्तानुकरणस्यात इतौ। (६-१-९८)**

अव्यक्तानुकरणस्य अतः इतौ इति पदच्छेदः। 'एङि पररूपम्' इति सूत्रात् पररूपमित्यनुवर्तते। 'एकः पूर्वपरयोः' इत्यधिकारः। अव्यक्तः - अस्फुटवर्णविभागः वृक्षपतनादिजनितध्वनिः। एवं च ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यादिति सूत्रार्थः।

यथा - पटत् + इति - पटिति।

अस्फुटवर्णविभागात् पटत् शब्दात् इति शब्दे परे अत् शब्दस्य इकारस्य च स्थाने पररूपैकादेशे पटिति इति रूपम्।

**(वा) एकाचो न। (वा. ३६३७)**

एकः अच् यस्य सः एकाच्। एकाच्भूतस्यानुकरणस्य 'अव्यक्तानुकरणस्यात इतौ' इति सूत्रेण उक्तं पररूपं न इत्यर्थः।

यथा - अत् + इति - अदिति।

अत्र एकाच्त्वात् 'एकाचो न' इति वार्तिकेन न पररूपम्।

**३६. तस्य परमाम्रेडितम्। (८-१-२)**

तस्य परम् आम्रेडितम् इति पदच्छेदः। 'सर्वस्य द्वे' इत्यनन्तरमिदं सूत्रं पठ्यते। ततश्च तस्येत्यनेन द्विरुक्तस्येति लभ्यते। एवं च द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यादिति सूत्रार्थः।

यथा - पटत् पटत् + इति - पटत्पटेति।

पटत् पटत् इति इति स्थिते पररूपस्य पटत्शब्दस्य आम्रेडितसंज्ञा। तस्य अत् शब्दस्य 'नाम्रेडितस्यान्त्यस्य तु वा' इति सूत्रेण पररूपं न। तथापि अन्त्यस्य तकारस्य विकल्पेन पररूपं स्यात्। एवं चेत् पटत् पटत् इति स्थिते अन्त्यस्य तकारस्य, इकारस्य च पररूपे इकारे पटत्पट इति इति जाते 'आद्गुणः' इति सूत्रेण गुणे पटत्पटेति इति रूपम्।

**३७. झलां जशोऽन्ते। (८-२-३९)**

झलां जशः अन्ते इति पदच्छेदः। एवं च पदान्ते झलां जशः स्युरिति सूत्रार्थः।

यथा - पटत् पटत् + इति - पटत्पटदिति।

पटत् पटत् + इति इति स्थिते पररूपाभावपक्षे 'झलां जशोऽन्ते' इति सूत्रेण झलः जश् - स्थानसाम्यात् तकारस्य दकारे पटत्पटदिति इति रूपम्।

**३८. अकः सवर्णे दीर्घः। (६-१-१०१)**

अकः सवर्णे दीर्घः इति त्रिपदं सूत्रम्। अकः इति पञ्चमी। 'इको यणचि' इति सूत्रात् अचीत्यनुवर्तते। 'एकः पूर्वपरयोः' इत्यधिकारः। एवं च अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यादिति सूत्रार्थः।

यथा - दैत्य + अरिः - दैत्यारिः।

दैत्य + अरिः इति स्थिते पूर्वपरयोः अकारयोः 'अकः सवर्णे दीर्घः' इति सूत्रेण एको दीर्घ आकारः - दैत्यारिः इति रूपम्।

एवम् - श्री + ईशः - श्रीशः।

विष्णु + उदयः - विष्णूदयः।

अचि इति किम्?

यथा - कुमारी + शेते - कुमारी शेते।

अचीत्यननुवृत्तौ ईकारस्य शकारस्य च तालुस्थानविवृतप्रयत्नसाम्येन सवर्णतया तयोः दीर्घ ईकार एकादेशः स्यात् तन्निवृत्त्यर्थमचीत्यनुवर्तनीयमिति भावः।

अत्र एकः संशयः अस्ति ईकारशकारयोः स्थानप्रयत्नसाम्येऽपि 'नाज्झलौ' इति सूत्रेण सावर्ण्यनिषेधात्, पुनः अचीति किम् इति?

अत्र एवं वदति 'नाज्झलौ' इति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः, ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः।

'अकः' इति किम्?

हरे + ए - हरये। अत्र पूर्वपरयोः एकारः एव। किन्तु सूत्रेण अकः इत्युक्तात् एकारस्य सवर्णदीर्घं न।

'अकोऽकि दीर्घः' इत्येव सुवचम्।

**(वा) ऋति सवर्णे ऋ वा। (वा. ३६४०)**

अकः सवर्णे ऋति परे पूर्वपरयोः ऋइत्येकादेशः वा स्यादित्यर्थः।

यथा - होतृ + ऋकारः - होतृकारः, होतॄकारः।

होतृ + ऋकारः इति स्थिते पूर्वपरयोः ऋकारयोः 'ऋति सवर्णे ऋ वा' इति वार्तिकेन विकल्पेन ऋ इत्येकादेशे होतृकारः इति रूपम्।

ऋकारएकादेशाभावपक्षे तु होतृ + ऋकारः इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे होतॄकारः इति रूपम्।

**(वा) लृति सवर्णे लृ वा। (वा. ३६४१)**

अकः सवर्णे लृति परे पूर्वपरयोः लृ इत्येकादेशो वा स्यादित्यर्थः।

यथा - होत्लृ + लृकारः - होत्लृकारः, होतॄकारः।

अत्र लृकारात् सवर्णे लृकारे परे 'लृति सवर्णे लृ वा' इति वार्तिकेन पूर्वपरयोः लृकारयोः विकल्पेन लृकारैकादेशे होत्लृकारः इति रूपम्।

लृकारादेशाभावपक्षे 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे प्राप्ते लृकारस्य दीर्घाभावे 'ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति वार्तिकेन ऋकारलृकारयोः सावर्ण्यात् दीर्घऋकारैकादेशे होतॄकारः इति रूपम्।

**३९. एङः पदान्तादति। (६-१-१०९)**

एङः पदान्तात् अति इति पदच्छेदः। 'अमि पूर्वः' इति सूत्रात् पूर्वः इत्यनुवर्तते। 'एकः पूर्वपरयोः' इत्यधिकृतम्। एङः इति पञ्चम्यन्तम्। पदान्तात् इति एङः विशेषणम्। अत् इति ह्रस्वाकारस्य तपरकरणम्।

तस्य सप्तमी अति - ह्रस्वाकारे परे इत्यर्थः। एवं च पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यादिति सूत्रार्थः।

यथा - हरे + अव - हरेऽव।

हरे + अव इति स्थिते 'एङः पदान्तादति' इति सूत्रेण एकारस्य अकारस्य च स्थाने पूर्वरूप एकार एकादेशः, हरेऽव (हर् ए व) इति रूपम्।

एवम् - विष्णो + अव - विष्णोऽव।

## ४०. सर्वत्र विभाषा गोः। (६-१-१२२)

सर्वत्र विभाषा गोः इति त्रिपदं सूत्रम्। 'एङः पदान्तादति' इति समग्रं सूत्रमनुवर्तते। 'प्रकृत्यान्तः पादमव्यपरे' इति सूत्रात् प्रकृत्या इति च। सर्वत्र इत्यस्य लोके वेदे च इत्यर्थः। विभाषा शब्दः विकल्पार्थकः। एङः इति गोः विशेषणम्, तदन्तविधिः -एङन्तस्य गोः इत्यर्थः। प्रकृत्या इत्यस्य सन्ध्यभावः इत्यर्थः। एवं च लोके वेदे चैङन्तस्य गोरिति वा प्रकृतिभावः स्यात्पदान्ते इति सूत्रार्थः।

यथा - गो + अग्रम् - गो अग्रम्, गोऽग्रम्।

गो + अग्रम् इति स्थिते 'सर्वत्र विभाषा गो' इति सूत्रेण पदान्तस्य एङन्तस्य (ओकारान्तस्य) गो शब्दस्य प्रकृतिभावे गो अग्रम् इति रूपम्।

प्रकृतिभावाभावपक्षे तु 'एङः पदान्तादति' इति सूत्रेण पूर्वपरयोः ओकाराकारयोः स्थाने पूर्वरूप ओकार एकादेशः, गोऽग्रम् इति रूपम्।

'एङन्तस्य' इति किम्?

यथा - चित्रगु + अग्रम् - चित्रग्वग्रम्।

अत्र गो शब्दः, एङन्तः पदान्तः न। अतः अत्र 'सर्वत्र विभाषा गोः' इति सूत्रं न प्रवर्तते। 'इको यणचि' इति सूत्रेण उकारस्य वकारादेशे चित्रग्वग्रम् इति रूपम्।

'पदान्ते' इति किम्?

यथा - गो + अस् - गोः।

अत्र गो शब्दः, एङन्तः अपि गो अस् इत्योकारस्य पदान्तत्वाभावान्न प्रकृतिभावः।

## ४१. अवङ् स्फोटायनस्य। (६-१-१२३)

अवङ् स्फोटायनस्य इति द्विपदं सूत्रम्। 'एङः पदान्तादति' इति सूत्रात् एङः पदान्तात् इत्यनुवर्तते। 'सर्वत्र विभाषा गोः' इति सूत्रात् गोः इति, 'इको यणचि' इति सूत्रात् अचि इति च। स्फोटायनः पाणिनेः पूर्वाचार्यः। एवं च अचि परे पदान्ते गोरवङ् स्यादिति सूत्रार्थः।

यथा - गो + अग्रम् - गवाग्रम्।

गो + अग्रम् इति स्थिते 'अवङ् स्फोटायनस्य' इति सूत्रेण अचि परे पदान्तस्य ओकारस्य अवङादेशे ग् अव अग्रम् इति स्थिते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे गवाग्रम् इति रूपम्। विकल्पाभावपक्षे तु गो अग्रम्, गोऽग्रम् इति च रूपम्।

पदान्ते इति किम्?

यथा - गो + ङि - गवि।

गो + ङि इति स्थिते गो इत्यस्य पदान्तत्वविरहान्न अवङ्। ङकारस्य इत्संज्ञायां लोपे गो + इ इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे ग् अव् इ - गवि इति रूपम्।

**४२. इन्द्रे च। (६-१-१२४)**

इन्द्रे च इति द्विपदं सूत्रम्। 'सर्वत्र विभाषा गोः' इति सूत्रात् गोः इति, 'अवङ् स्फोटायनस्य' इति सूत्रात् अवङ् इति, 'इको यणचि' इति सूत्रात् अचीति च अनुवर्तन्ते। एवं च गोरवङ् स्यादिन्द्रे इति सूत्रार्थः।

यथा - गो + इन्द्रः- गवेन्द्रः ।

गो + इन्द्रः, इति स्थिते इन्द्र शब्दे परे 'इन्द्रे च' इति सूत्रेण गो शब्दस्य ओकारस्य अवङादेशे गव इन्द्रः इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे एकारैकादेशे गवेन्द्रः इति रूपम्।

यथा - गो + अक्षः - गवाक्षः।

गो + अक्षः अति स्थिते ओकारस्य पदान्तत्वविरहेऽपि व्यवस्थितविभाषया 'सर्वत्र विभाषा गोः' इत्याश्रित्य ओकारस्य अवङादेशे गव अक्षः इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे गवाक्षः इति रूपम्।

## अथ हल्सन्धिप्रकरणम्।

**१. स्तोः श्चुना श्चुः। (८-४-४०)**

स्तोः श्चुना श्चुः इति त्रिपदं सूत्रम्। स् च तु श्च स्तुः इति समाहारद्वन्द्वः, तस्य स्तोः। श् च चुश्च श्चुः, तेन श्चुना। एवं च सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः इति सूत्रार्थः।

यथा - हरिस् + शेते - हरिश्शेते।

हरिस् + शेते इति स्थिते सकारस्य शकारयोगे 'स्तोः श्चुना श्चुः' इति सूत्रेण शकारादेशे हरिश्शेते इति रूपम्।

एवम् - रामस् + चिनोति - रामश्चिनोति।

सत् + चित् - सच्चित्।

शार्ङ्गिन् + जय - शार्ङ्गिञ्जय।

## २. शात्। (८-४-४४)

शात् इति एकपदं सूत्रम्। 'न पदान्तात्' इति सूत्रात् न इत्यनुवर्तते। 'स्तोः श्चुना श्चुः' इति सूत्रात् तोः इति चुः इति च। एवं च शात्परस्य तवर्गस्य चुत्वं न स्यादिति सूत्रार्थः।

यथा - विश् + नः - विश्नः।

विश् + नः इति स्थिते शकारात् परः नकारः। अतः 'स्तोः श्चुना श्चुः' इति सूत्रेण प्राप्तं श्चुत्वं 'शात्' इति सूत्रेण निषिध्यते। एवं विश्नः इति रूपम्।

एवम् - प्रश् + नः - प्रश्नः।

## ३. ष्टुना ष्टुः। (८-४-४१)

ष्टुना ष्टुः इति द्विपदं सूत्रम्। ष् च टुश्च अनयोः समाहारः ष्टुः, तेन ष्टुना। 'स्तोः श्चुना श्चुः' इति सूत्रात् स्तोः इत्यनुवर्तते। स् च तुश्च अनयोः समाहारः स्तुः, तस्य स्तोः। सकारतवर्गयोः इत्यर्थः। एवं स्तोः ष्टुना योगे ष्टुः स्यादिति सूत्रार्थः।

यथा - रामस् + षष्ठः - रामष्षष्ठः।

रामस् + षष्ठः इति स्थिते सकारस्य षकारेण योगे 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वे रामष्षष्ठः इति रूपम्।

एवम् - रामस् + टीकते - रामष्टीकते।

पेष् + ता - पेष्टा।

तत् + टीका - तट्टीका।

चक्रिन् + ढौकसे - चक्रिण्ढौकसे।

## ४. न पदान्ताट्टोरनाम्। (८-४-४२)

न पदान्तात् टोः अनाम् इति पदच्छेदः। अनाम् इति लुप्तषष्ठीकं पदम्। 'स्तोः श्चुना श्चुः' इति सूत्रात् स्तोः इत्यनुवर्तते। अनाम् इति तस्य विशेषणम्। एवं च पदान्तात् टवर्गात् परस्यानामः स्तोः ष्टुर्न स्यादिति सूत्रार्थः।

यथा - षड् + सन्तः - षट् सन्तः।

षड् + सन्तः इति स्थिते डकारस्य 'खरि च' इति सूत्रेण चर्त्वेन षट् सन्तः इति जाते षट् इति

टवर्गात् परस्य अनामः सकारस्य ष्टुत्वं - षकारः न भवति। अतः षट्सन्तः इति रूपम्।

एवम् - षड् + ते - षट् ते।

पदान्तात् इति किम्?

अस्मिन् सूत्रे 'पदान्तात्' इत्युक्तेः ईट्टे इत्यत्र ष्टुत्वनिषेधो न।

यथा - ईड् + ते - ईट्टे।

ईड् + ते इति स्थिते धात्ववयवस्य डकारस्य पदान्तत्वाभावात् तत्र 'न पदान्ताट्टोरनाम्' इति सूत्रेण स्तोः ष्टुत्वनिषेधः न। तत्र डकारस्य 'खरि च' इति सूत्रेण चर्त्वे ईट् ते इति जाते 'ष्टुना ष्टुः' इति सूत्रेण तकारस्य ष्टुत्वे टकारे ईट्टे इति रूपम्।

टोः इति किम्?

अस्मिन् सूत्रे 'टोः' इत्युक्तेः टवर्गात् परस्यैव ष्टुत्वनिषेधः, न तु षकारात् परस्यापि।

यथा - सर्पिष् + तमम् - सर्पिष्टमम्।

सर्पिष् + तमम् इति स्थिते 'न पदान्ताट्टोरनाम्' इति सूत्रेण तकारस्य ष्टुत्वनिषेधः न। अतः 'ष्टुना ष्टुः' इति सूत्रेण तकारस्य ष्टुत्वे - टकारे सर्पिष्टमम् इति रूपम्।

**(वा) अनाम्नवतिनगरीणामिति वाच्यम्। (वा. ५०१६)**

ष्टुत्वप्रतिषेधः नाम्, नवति, नगरी शब्दावयवपरस्यापि न इति वक्तव्यः।

यथा - षट् + नाम् - षण्णाम्।

'स्वादिष्वसर्वनामस्थाने' इति पदान्तत्वात् टस्य जश्त्वेन डकारे षड् नाम् इति जाते 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन डकारस्य णकारे षण् नाम् इति जाते 'अनाम्नवतिनगरीणामिति वाच्यम्' इति वार्तिकेन ष्टुत्वनिषेधाभावात् 'ष्टुना ष्टुः' इति सूत्रेण नकारस्य ष्टुत्वे णकारे षण्णाम् इति रूपम्।

एवम् - षट् + नवतिः - षण्णवतिः।

षट् + नगर्यः - षण्णगर्यः।

**५. तोः षि। (८-४-४३)**

तोः षि इति द्विपदं सूत्रम्। 'ष्टुना ष्टुः' इति सूत्रात् ष्टुः इति 'न पदान्ताट्टोरनाम्' इति सूत्रात् न इति च अनुवर्तेते। एवं च तवर्गस्य षकारे परे न ष्टुत्वम् इति सूत्रार्थः।

यथा - सन् + षष्ठ - सन्षष्ठः।

सन् + षष्ठः इति स्थिते नकारस्य षकारयोगेऽपि 'तोः षि' इति सूत्रेण ष्टुत्वनिषेधे सन्षष्ठः इति रूपम्।

**६. झलां जशोऽन्ते। (८ - २- ३९)**

झलां जशः अन्ते इति पदच्छेदः। एवं च अन्ते झलां जश् स्युः इति सूत्रार्थः।

यथा - वाक् + ईशः - वागीशः।

वाक् + ईशः इति स्थिते ककारस्य (झलः) 'झलां जशोऽन्ते' इति सूत्रेण जश्त्वे स्थानसाम्यात् गकारे वाग् ईशः - वागीशः इति रूपम्।

एवम् - चित् + रूपम् - चिद्रूपम्।

**७. यरोऽनुनासिकेऽनुनासिको वा। (८-४-४५)**

यरः अनुनासिके अनुनासिकः वा इति पदच्छेदः। 'न पदान्ताट्टोरनाम्' इति सूत्रात् पदान्तात् इत्यनुवर्तते, षष्ठ्यन्ततया विपरिणम्यते च। यरः इति षष्ठ्यन्तं पदम्। एवं च यरः पदान्तस्य अनुनासिके परे अनुनासिको वा स्यादिति सूत्रार्थः।

यथा - एतद् + मुरारि - एतन्मुरारिः, एतद्मुरारिः।

एतद् + मुरारिः इति स्थिते अनुनासिके मकारे परे पूर्वस्य यरः दकारस्य 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रेण विकल्पेन अनुनासिके, स्थानसाम्यात् नकारे एतन्मुरारिः इति रूपम्।

अनुनासिकाभावपक्षे तु एतद्मुरारिः इति रूपम्।

**(वा) प्रत्यये भाषायां नित्यम्। (वा. ५०१७)**

अनुनासिकादौ प्रत्यये परे पदान्तस्य यरः लौकिकभाषायां नित्यम् अनुनासिकादेशः भवति इत्यर्थः।

यथा - तत् + मात्रम् - तन्मात्रम्।

तत् + मात्रम् इति स्थिते अनुनासिकादौ मात्रच् प्रत्यये परे पूर्वस्य यरः तकारस्य 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन अनुनासिके स्थानसाम्यात् नकारे तन्मात्रम् इति रूपम्।

एवम् - चित् + मयम् - चिन्मयम्। (मयट् प्रत्यये परे)

**८. तोर्लि। (८-४-६०)**

तोः लि इति पदच्छेदः। 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रात् परसवर्णः इत्यनुवर्तते। तोः इति षष्ठी। लि इति सप्तमी। एवं च तवर्गस्य लकारे परे परसवर्णः स्यादिति सूत्रार्थः।

यथा - तत् + लयः - तल्लयः।

तत् + लयः इति स्थिते लकारे परे तकारस्य 'तोर्लि' इति सूत्रेण परसवर्णे तल्लयः इति रूपम्।

एवम् - विद्वान् + लिखति - विद्वाँल्लिखति।

### ९. उद स्थास्तम्भोः पूर्वस्य। (८-४-६१)

उदः स्थास्तम्भोः पूर्वस्य इति त्रिपदं सूत्रम्। उदः इति पञ्चमी। स्थास्तम्भोः इति षष्ठीद्विवचनम्। एवं च उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यादिति सूत्रार्थः।

यथा - उद् + स्थानम् - उत्थानम्।

उद् + स्थानम् इति स्थिते 'आदेः परस्य' इति सूत्रेण परस्य आदेः सकारस्य अनेन सूत्रेण पूर्वसवर्णादेशः। तत्र अघोषमहाप्राणबाह्यप्रयत्नसाम्यात् सस्य 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रेण पूर्वसवर्णे थकारादेशे उद् थ् थानम् इति जाते 'झरो झरि सवर्णे' इति सूत्रेण आद्यथकारलोपे उद् थानम् इति जाते 'खरि च' इति सूत्रेण चर्त्वे दकारस्य तकारे उत् थानम् - उत्थानम् इति रूपम्।

एवम् - उद् + स्तम्भनम् - उत्तम्भनम्।

### १०. झयो होऽन्यतरस्याम्। (८-४-६२)

झयः हः अन्यतरस्याम् इति पदच्छेदः। झयः इति पञ्चमी, हः इति षष्ठी। 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रात् पूर्वस्य इति 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रात् सवर्णस्य इति च अनुवर्तेते। एवं च झयः परस्य हस्य पूर्वसवर्णो वा स्यादिति सूत्रार्थः।

यथा - वाक् + हरिः - वाग्घरिः, वाग्हरिः।

वाक् + हरिः इति स्थिते 'झलां जशोऽन्ते' इति सूत्रेण ककारस्य जश्त्वे गकारे वाग् हरिः इति जाते 'झयो होऽन्यतरस्याम्' इति सूत्रेण विकल्पेन घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशे वर्गचतुर्थे पूर्वसवर्णे घकारे वाग्घरिः इति रूपम्।

पूर्वसवर्णाभावे तु वाग्हरिः इति रूपम्।

### ११. शश्छोऽटि। (८-४-६३)

शः छः अटि इति पदच्छेदः। 'झयो होऽन्यतरस्याम्' इति सूत्रात् झयः इति अन्यतरस्याम् इति च अनुवर्तेते। शः इति षष्ठी, छः इति प्रथमा, झयः इति पञ्चमी। एवं च पदान्तात् झयः परस्य शस्य छो वा स्यात् अटि इति सूत्रार्थः।

### १२. खरि च। (८-४-५५)

खरि च इति द्विपदं सूत्रम्। 'झलां जश् झशि' इति सूत्रात् झलाम् इति 'अभ्यासे चर्च' इति सूत्रात् चर् इति च अनुवर्तेते। एवं च खरि परे झलां चरः स्युः इति सूत्रार्थः।

यथा - तद् + शिवः - तच्छिवः, तच्शिवः।

+ शिवः इति स्थिते 'स्तोः श्चुना श्चुः' इति सूत्रेण श्चुत्वे दकारस्य जकारादेशे तज् शिवः इति

जाते ‘खरि च’ इति सूत्रेण चर्त्वे जकारस्य चकारादेशे तच् शिवः इति जाते ‘शश्छोऽटि’ इति सूत्रेण शकारस्य छकारादेशे तच्छिवः इति रूपम्।

विकल्पाभावपक्षे तु छकारादेशाभावे तच्शिवः इति रूपम्।

**(वा) छत्वममीति वाच्यम्। (वा. ५०२५)**

‘शश्छोऽटि’ इति सूत्रे अटीति विहाय अमीति वक्तव्यम् इत्यर्थः।

[illegible] + श्लोकेन - तच्छ्लोकेन, तच्श्लोकेन।

तद् + श्लोकेन इति स्थिते ‘स्तोः श्चुना श्चुः’ इति सूत्रेण श्चुत्वे दकारस्य जकारादेशे तज् श्लोकेन इति जाते ‘खरि च’ इति सूत्रेण चर्त्वे जकारस्य चकारादेशे तच् श्लोकेन इति जाते अनेन वार्तिकेन अमि परेपि ‘शश्छोऽटि’ इति सूत्रेण शकारस्य छकारादेशे तच्छ्लोकेन इति रूपम्।

विकल्पाभावपक्षे तु तच्श्लोकेन इति रूपम् ।

**१३. मोऽनुस्वारः। (८-३-२३)**

मः अनुस्वारः इति पदच्छेदः। पदस्य इत्यधिकृतम्। ‘हलि सर्वेषाम्’ इति सूत्रात् हलि इत्यनुवर्तते। मः इति षष्ठी। एवं च मान्तस्य पदस्य अनुस्वारः स्यात् हलि इति सूत्रार्थः।

यथा - हरिम् + वन्दे - हरिं वन्दे।

हरिम् + वन्दे इति स्थिते ‘मोऽनुस्वारः’ इति सूत्रेण पदान्तस्य मकारस्य अनुस्वारे हरिं वन्दे इति रूपम्।

**१४. नश्चापदान्तस्य झलि। (८, ३, ३४)**

नः च अपदान्तस्य झलि इति पदच्छेदः। चकारेण मो इत्यनुकृष्यते। ‘मोऽनुस्वारः’ इति सूत्रात् अनुस्वारः इत्यनुवर्तते। एवं च नस्य मस्य च अपदान्तस्य झल्यनुस्वारः इति सूत्रार्थः।

यथा - यशान् + सि - यशांसि

यशान् + सि इति स्थिते अपदान्तस्य नकारस्य ‘नश्चापदान्तस्य झलि’ इति सूत्रेण अनुस्वारे यशांसि इति रूपम्।

एवम् - आक्रम् + स्यते - आक्रंस्यते।

**१५. अनुस्वारस्य ययि परसवर्णः। (८, ४, ४८)**

अनुस्वारस्य ययि परसवर्णः इति त्रिपदं सूत्रम्। एवं च अनुस्वारस्य ययि परे परसवर्णः स्यादिति सूत्रार्थः। एतत् परसवर्णविधायकं सूत्रं भवति।

यथा - शां + तः - शान्तः।

शां + तः इति स्थिते अनुस्वारस्य यथि परे (तकारः) 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रेण परसवर्णे स्थानसाम्यात् नकारे शान् तः - शान्तः इति रूपम्।

एवम् - अन् + कितः - अङ्कितः।

अन् + चितः - अञ्चितः।

कुन् + ठितः - कुण्ठितः।

गुन् + फितः - गुम्फितः।

**१६. वा पदान्तस्य। (८-४-५९)**

वा पदान्तस्य इति द्विपदं सूत्रम्। 'अनुस्वारस्य ययि परसवर्णः' इति समग्रं सूत्रमनुवर्तते। एवं च पदान्तस्य अनुस्वारस्य ययि परे परसवर्णो वा स्यादिति सूत्रार्थः।

यथा - त्वम् + करोषि - त्वङ्करोषि, त्वं करोषि।

त्वम् + करोषि इति स्थिते 'मोऽनुस्वारः' इति सूत्रेण मकारस्य अनुस्वारे त्वं करोषि इति जाते 'वा पदान्तस्य' इति सूत्रेण पदान्तस्य अनुस्वारस्य विकल्पेन परसवर्णे त्वङ्करोषि इति रूपम्।

परसवर्णाभावपक्षे तु त्वं करोषि इति रूपम्।

**१७. डः सि धुट्। (८-३-२९)**

डः सि धुट् इति त्रिपदं सूत्रम्। डः इति पञ्चमी, सि इति सप्तमी। 'हे मपरे वा' इति सूत्रात् वा इत्यनुवर्तते। एवं च डात्परस्य सस्य धुड् वा स्यादिति सूत्रार्थः।

'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वाद्' इति न्यायेन सप्तम्याः षष्ठ्या विपरिणामः।

यथा - षड् + सन्तः - षट्त् सन्तः, षट्सन्तः।

षड् + सन्तः इति स्थिते 'डः सि धुट्' इति सूत्रेण विकल्पेन डात्परस्य सस्य धुडागमः। धुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। उकारः उच्चारणार्थः। एवं षड् ध् सन्तः इति जाते 'खरि च' इति सूत्रेण धकारस्य, पुनः डकारस्य च चर्त्वे षट् त् सन्तः इति रूपम्।

धुडभावपक्षे तु डकारस्य चर्त्वे षट् सन्तः इति रूपम्।

**१८. नश्च। (८-३-३०)**

नः च इति पदच्छेदः। 'डः सि धुट्' इति सूत्रात् धुट् इत्यनुवर्तते। नः इति पञ्चमी। एवं च नकारान्तात्परस्य सस्य धुड् वा स्यादिति सूत्रार्थः।

यथा - सन् + सः - सन्त्सः, सन्सः।

सन् + सः इति स्थिते नकारान्तात् परस्य सकारस्य 'नश्च' इति सूत्रेण धुडागमः। धुटि टकारः

'हलन्त्यम्' इति सूत्रेण इत्। उकारः उच्चारणार्थः। धुडागमः सस्य आद्यावयवः। सन् ध् सः इति जाते 'खरि च' इति सूत्रेण धकारस्य चर्त्वे सन्त्सः इति रूपम्।

धुडागमाभावपक्षे तु सन्सः इति रूपम्।

## १९. शि तुक्। (८-३-३१)

शि तुक् इति द्विपदं सूत्रम्। शि इति सप्तमी। 'नश्च' इति सूत्रात् नः इत्यनुवर्तते, षष्ठ्यन्ततया विपरिणम्यते च। पदस्य इत्यधिकारः। 'हे मपरे वा' इति सूत्रात् वा इत्यनुवर्तते। एवं च पदान्तस्य नस्य शे परे तुग्वा स्यादिति सूत्रार्थः।

यथा - सन् + शम्भुः - सञ्छम्भुः, सञ्च्छम्भुः।, सञ्च्शम्भुः, सञ्शम्भुः।

सन् + शम्भुः इति स्थिते 'शि तुक्' इति सूत्रेण नकारस्य तुगागमः। तुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण तुगागमः नकारस्य अन्तावयवः। सन् त् शम्भुः इति जाते 'स्तोः श्चुना श्चुः' इति सूत्रेण तकारस्य श्चुत्वे चकारे सन् च् शम्भुः इति जाते, पुनः नकारस्य श्चुत्वे ञकारे सञ् च् शम्भुः इति जाते 'शश्छोऽटि' इति सूत्रेण शकारस्य छकारे सञ्च् छम्भुः इति जाते 'झरो झरि सवर्णे' इति सूत्रेण चकारस्य विकल्पेन लोपे सञ्छम्भुः इति रूपम्।

चकारलोपाभावपक्षे सञ्च्छम्भुः इति रूपम्।

छत्वाभावपक्षे सञ्च्शम्भुः इति रूपम्।

तुगागमाभावपक्षे नकारस्य शकारयोगे श्चुत्वेन ञकारे सञ्शम्भुः इति रूपम्। एवमत्र रूपचतुष्टयं बोध्यम् -

ञछौ ञचछा ञचशा ञशाविति चतुष्टयम्।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात्।।

## २०. ङमो ह्रस्वादचि ङमुण्नित्यम्। (८-३-३२)

ङमः ह्रस्वात् अचि ङमुट् नित्यम् इति पदच्छेदः। ङमः इति पञ्चमी। पदस्य इत्यधिक्रियते, पञ्चम्या विपरिणम्यते च। अचि इति सप्तमी, षष्ठ्या विपरिणम्यते च। एवं च ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्य अचः नित्यं ङमुडागमः स्यादिति सूत्रार्थः।

यथा - प्रत्यङ् + आत्मा - प्रत्यङ्ङात्मा।

प्रत्यङ् + आत्मा इति स्थिते ह्रस्वाकारात् परः ङम् (ङकारः) भवति। तस्मात्परस्य अचः (आकारस्य) 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति सूत्रेण ङमुडागमः (ङुडागमः) । ङुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत् उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण ङुडागमः अचः आद्यावयवः। प्रत्यङ् ङ् आत्मा - प्रत्यङ्ङात्मा इति रूपम्।

एवम् - सुगण् + ईशः - सुगण्णीशः।

सन् + अच्युतः - सन्नच्युतः।

पुनः - पुम् + कोकिलः - पुंस्कोकिलः, पुँस्कोकिलः।

अनुस्वारपक्षे - पुंस्कोकिलः।

अनुनासिकपक्षे - पुँस्कोकिलः।

एवम् - सम् + कर्ता - संस्कर्ता, सँस्कर्ता।

चक्रिन् + त्रायस्व - चक्रिंस्त्रायस्व, चक्रिँस्त्रायस्व।

कान् + कान् - कांस्कान्, काँस्कान्।

## २१. दीर्घात्। (६-१-७५)

दीर्घात् इति एकपदं सूत्रम्। 'शि तुक्' इति सूत्रात् तुक् इति 'छे च' इति सूत्रात् छे इति च अनुवर्तेते। एवं च दीर्घात् छे परे तुक् स्यादिति सूत्रार्थः। दीर्घस्यायं तुक्, न तु छस्य।

यथा - चे + छिद्यते - चेच्छिद्यते।

चे + छिद्यते इति स्थिते दीर्घात् छकारे परे 'दीर्घात्' इति सूत्रेण दीर्घस्य तुगागमः। तुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण तुगागमः दीर्घस्य अन्तावयवः। चे त् छिद्यते इति जाते 'स्तोः श्चुना श्चुः' इति सूत्रेण तकारस्य श्चुत्वे चकारे चे च् छिद्यते - चेच्छिद्यते इति रूपम्।

## २२. पदान्ताद्वा। (६-१-७६)

पदान्तात् वा इति पदच्छेदः। 'शि तुक्' इति सूत्रात् तुक् इति, 'छे च' इति सूत्रात् छे इति, 'दीर्घात्' इति सूत्रं च अनुवर्तन्ते। एवं च दीर्घात् पदान्तात् छे परे तुग्वा स्यादिति सूत्रार्थः।

यथा - लक्ष्मी + छाया - लक्ष्मीच्छाया, लक्ष्मीछाया।

लक्ष्मी + छाया इति स्थिते पदान्तात् दीर्घात् छकारे परे 'पदान्ताद्वा' इति सूत्रेण विकल्पेन दीर्घस्य तुगागमः। तुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण तुगागमः दीर्घस्य अन्तावयवः। लक्ष्मी त् छाया इति जाते 'स्तोः श्चुना श्चुः' इति सूत्रेण तकारस्य श्चुत्वे चकारे लक्ष्मी च् छाया - लक्ष्मीच्छाया इति रूपम्। तुगागमाभावपक्षे तु लक्ष्मीछाया इति रूपम्।

## अथ विसर्गसन्धिप्रकरणम्।

### १. विसर्जनीयस्य सः। (८-३-३४)

विसर्जनीयस्य सः इति द्विपदं सूत्रम्। विसर्जनीयस्य इत्यस्य विसर्गस्य इत्यर्थः। सः इत्यनेन सकारादेशः इत्यर्थः। 'खरवसानयोर्विसर्जनीयः' इति सूत्रात् खरि इत्यनुवर्तते। एवं खरि विसर्जनीयस्य सः स्यादिति सूत्रार्थः।

यथा - विष्णुः + त्राता - विष्णुस्त्राता।

विष्णुः + त्राता इति स्थिते खरि परे (तकारः) 'विसर्जनीयस्य सः' इति सूत्रेण विसर्गस्य सकारादेशे विष्णु स् त्राता - विष्णुस्त्राता इति रूपम्।

एवम् - शिरः + छेदम् - शिरश्छेदम्।

शिरस् छेदम् - विसर्जनीयस्य सः।

शिरश् छेदम् - स्तोः श्चुना श्चुः।

### २. शर्परे विसर्जनीयः। (८-३-३५)

शर्परे विसर्जनीयः इति द्विपदं सूत्रम्। 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इति, 'खरवसानयोर्विसर्जनीयः' इति सूत्रात् खरि इति च अनुवर्तेते। एवं च शर्परे खरि विसर्जनीयस्य विसर्जनीयः न तु अन्यत् इति सूत्रार्थः।

यथा - कः + त्सरुः - कःत्सरुः।

कः + त्सरु इति स्थिते खर्परेऽपि (तकारः) 'विसर्जनीयस्य सः' इति सूत्रं न प्रवर्तते। 'शर्परे विसर्जनीयः' इति सूत्रेण शर्परे (सकारः) खरि (तकारः) कः इत्यत्र विसर्गः तथैव भवति कःत्सरुः इति रूपम्।

एवम् - घनाघनः + क्षोभणः - घनाघनः क्षोभणः।

### ३. वा शरि। (८-३-३६)

वा शरि इति द्विपदं सूत्रम्। 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इति, 'शर्परे विसर्जनीयः' इति सूत्रात् विसर्जनीयः इति च अनुवर्तेते। शरि इति सप्तमी, शरि परे इत्यर्थः। शर् प्रत्याहारेण श, ष, स इत्येतेषां ग्रहणम्। एवं च शरि परे विसर्जनीयस्य विसर्जनीयः एव वा स्यादिति सूत्रार्थः।

यथा - हरिः + शेते - हरिः शेते, हरिश्शेते।

हरिः + शेते इति स्थिते शर्परे (शकारः) 'वा शरि' इति सूत्रेण विसर्गस्य विकल्पेन विसर्गे हरिः शेते इति रूपम्।

विसर्गाभावपक्षे तु खरि परे (शकारः) 'विसर्जनीयस्य सः' इति सूत्रेण विसर्गस्य सकारादेशे हरिस् शेते इति जाते 'स्तोः श्चुना श्चुः' इति सूत्रेण सकारस्य श्चुत्वे शकारे हरिश् शेते - हरिश्शेते इति रूपम्।

**(वा) खर्परे शरि वा विसर्गलोपो वक्तव्यः। (वा. ४९०६)**

खर्परके शरि परे विसर्गस्य लोपविकल्पो वक्तव्यः इत्यर्थः।

यथा - रामः + स्थाता - राम स्थाता, रामः स्थाता।

रामः + स्थाता इति स्थिते खर्परे (थकारः) शरिपरे (सकारः) 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति वार्तिकेन विकल्पेन विसर्गलोपे राम स्थाता इति रूपम्।

विसर्गलोपाभावपक्षे तु रामः स्थाता इति रूपम्।

एवम् - हरिः + स्फुरति - हरि स्फुरति, हरिः स्फुरति।

**४. सोऽपदादौ। (८-३-३८)**

सः अपदादौ इति पदच्छेदः। 'कुप्वो ⨯क ⨯पौ च' इति सूत्रात् कुप्वोः इत्यनुवर्तते। अपदादौ इति तद्विशेषणम्। 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इत्यनुवर्तते। एवं च विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः इति सूत्रार्थः।

**(वा) पाश-कल्प-क-काम्येष्विति वाच्यम्। (वा. ५०३३)**

सोऽपदादौ इति सूत्रस्यापवादः इदं वार्तिकम्। पाश-कल्प-क-काम्यशब्देषु परेषु अपि विसर्गस्य सकारादेशः स्यादिति वक्तव्यम्।

यथा - पयः + पाशम् - पयस्पाशम्।

पयः + पाशम् इति स्थिते 'पाशकल्पककाम्येष्विति वाच्यम्' इति वार्तिकोक्ते अपदादौ पयश्शब्दे परे 'सोऽपदादौ' इति सूत्रेण विसर्गस्य सकारादेशे पयस् पाशम् - पयस्पाशम् इति रूपम्।

एवम् - यशः + कल्पम् - यशस्कल्पम्।

यशः + कम् - यशस्कम्।

यशः + काम्यति - यशस्काम्यति।

**५. इणः षः। (८-३-३९)**

इणः षः इति द्विपदं सूत्रम्। इणः इति पञ्चमी। 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इत्यनुवर्तते। एवं च पाशकल्पककाम्येषु परेषु इणः परस्य विसर्गस्य षकारः स्यादिति सूत्रार्थः।

यथा - सर्पिः + पाशम् - सर्पिष्पाशम्।

सर्पिः + पाशम् इति स्थिते इकारात् परस्य विसर्गस्य 'इणः षः' इति सूत्रेण षकारादेशे सर्पिष् पाशम् - सर्पिष्पाशम् इति रूपम्।

एवम् - सर्पिः + कम् - सर्पिष्कम्।

सर्पिः + कल्पम् - सर्पिष्कल्पम्।

सर्पिः + काम्यति - सर्पिष्काम्यति।

## ६. इदुदुपधस्य चाप्रत्ययस्य। (८-३-४१)

इदुदुपधस्य च अप्रत्ययस्य इति पदच्छेदः। 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इत्यनुवर्तते। इदुदुपधस्येति तद्विशेषणम्। 'कुप्वो ×क ×पौ च' इति सूत्रात् कुप्वोः इत्यनुवर्तते। अप्रत्ययस्य इत्यनेन प्रत्ययावयवभिन्नस्य इत्यर्थः। एवं च इकारोकारोपधस्य अप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः इति सूत्रार्थः।

यथा - निस् + प्रत्यूहम् - निष्प्रत्यूहम्।

निस् + प्रत्यूहम् इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे निर् प्रत्यूहम् इति जाते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे निः प्रत्यूहम् इति जाते इकारात् परस्य अप्रत्ययस्य विसर्गस्य 'इदुदुपधस्य चाप्रत्ययस्य' इति सूत्रेण षत्वे निष् प्रत्यूहम् - निष्प्रत्यूहम् इति रूपम्।

एवम् - आविस् + कृतम् - आविष्कृतम्।

दुस् + कृतम् - दुष्कृतम्।

अप्रत्ययस्य इति किम्?

प्रत्ययावयवस्य विसर्गस्य षकारादेशः न भवति।

यथा - अग्निः + करोति - अग्निः करोति।

अग्निः + करोति इत्यत्र विसर्गः सुप् प्रत्ययस्यावयवः भवति। अतः 'इदुदुपधस्य चाप्रत्ययस्य' इति सूत्रेण विसर्गस्य षकारादेशः न।

एवम् - वायुः + करोति - वायुः करोति।

## ७. तिरसोऽन्यतरस्याम्। (८-३-४२)

तिरसः अन्यतरस्याम् इति पदच्छेदः। 'विसर्जनीयस्य सः' इति सूत्रात् विसर्जनीयस्य इति 'कुप्वो ×क ×पौ च' इति सूत्रात् कुप्वोः इति, 'सोऽपदादौ' इति सूत्रात् सः इति च अनुवर्तन्ते। एवं च तिरसो विसर्गस्य सो वा स्यात् कुप्वोः इति सूत्रार्थः।

यथा - तिरः + कर्ता - तिरस्कर्ता, तिरः कर्ता।

तिरः + कर्ता इति स्थिते ककारे परे तिरसः विसर्गस्य 'तिरसोऽन्यतरस्याम्' इति सूत्रेण विकल्पेन सकारादेशे तिरस् कर्ता - तिरस्कर्ता इति रूपम्। विकल्पाभावपक्षे तु तिरः कर्ता इति रूपम्।

# अथ स्वादिसन्धिप्रकरणम्।

## १. ससजुषो रुः। (८-२-६६)

ससजुषोः रुः इति द्विपदं सूत्रम्। सश्च सजुष् च ससजुषौ, तयोः ससजुषोः। पदस्य इत्यधिकृतम्। सकारसजुष्शब्दौ पदस्य विशेषणम्। एवं च पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यादिति सूत्रार्थः।

## २. अतो रोरप्लुतादप्लुते। (६-१-११३)

अतः रोः अप्लुतात् अप्लुते इति पदच्छेदः। अप्लुतात् इति अतः इत्यस्य विशेषणम्। द्वावपि पञ्चमी। 'ऋत उत्' इति सूत्रात् उत् इति 'एङः पदान्तादति' इति सूत्रात् अति इति च अनुवर्तेते। एवं च अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति इति सूत्रार्थः।

यथा - शिवस् + अर्च्यः - शिवोऽर्च्यः।

शिवस् + अर्च्यः इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे शिवर् अर्च्यः इति जाते 'अतो रोरप्लुतादप्लुते' इति सत्रेण रोः उत्वे शिव उ अर्च्यः इति जाते 'आद्गुणः' इति सूत्रेण गुणे ओकारे एकादेशे शिवो अर्च्यः इति जाते 'एङः पदान्तादति' इति सूत्रेण पूर्वरूपे ओकारे एकादेशे शिवोऽर्च्यः इति रूपम्।

## ३. हशि च। (६-१-११४)

हशि च इति द्विपदं सूत्रम्। हशि इति सप्तमी। हशि परे इत्यर्थः। 'अतो रोरप्लुतादप्लुते' इति सूत्रात् अतः अप्लुतात् रोः इत्यनुवर्तते। 'ऋत उत्' इति सूत्रात् उत् इति च। एवं च अप्लुतादतः परस्य रोरुः स्याद्धशि इति सूत्रार्थः।

यथा - शिवस् + वन्द्यः - शिवो वन्द्यः।

शिवस् + वन्द्यः इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे शिवर् वन्द्यः इति जाते अप्लुतादतः परस्य रोः हशि परे (वकारः) 'हशि च' इति सूत्रेण उत्वे शिव उ वन्द्यः इति जाते 'आद्गुणः' इति सूत्रेण गुणे ओकारैकादेशे शिवो वन्द्यः इति रूपम्।

## ४. भो-भगो-अघो-अपूर्वस्य योऽशि। (८-३-१७)

भो भगो अघो अपूर्वस्य यः अशि इति पदच्छेदः। अशि इति सप्तमी, अशि परे इत्यर्थः। 'रोस्सुपि' इति सूत्रात् रोः इत्यनुवर्तते। भो भगो अघो अ इत्येतेषां द्वन्द्वः। एते पूर्वे यस्मादिति बहुव्रीहिः। पूर्वशब्दः प्रत्येकं संबद्ध्यते - भोपूर्वकस्य, भगो पूर्वकस्य, अघो पूर्वकस्य, अकारपूर्वकस्य इत्यर्थः। एवं च भोपूर्वस्य, भगोपूर्वस्य, अघोपूर्वस्य, अपूर्वस्य च रोः यादेशः स्यादशि परे इति सूत्रार्थः।

यथा - देवास् + इह - देवा इह, देवायिह।

देवास् + इह इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे देवार् इह इति जाते 'भो भगो अघो अपूर्वस्य योऽशि' इति सूत्रेण रोः यत्वे देवाय् इह इति जाते 'लोपः शाकल्यस्य' इति सूत्रेण विकल्पेन यकारलोपे देवा इह इति रूपम्। लोपाभावपक्षे तु देवायिह इति रूपम्।

अशि इति किम्?

अशः अभावे (परे) रोः यत्वं न।

यथा - देवास् + सन्ति - देवास्सन्ति।

### ५. हलि सर्वेषाम्। (८-३-२२)

हलि सर्वेषाम् इति द्विपदं सूत्रम्। हलि इति सप्तमी, हलि परे इत्यर्थः। सर्वेषाम् इत्यस्य सर्वेषामाचार्याणाम् मते इत्यर्थः। 'भो भगो अघो अपूर्वस्य योऽशि' इति सूत्रात् भो भगो अघो अपूर्वस्य इत्यनुवर्तते। 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' इति सूत्रात् यकारः, 'लोपः शाकल्यस्य' इति सूत्रात् लोपः इति च। एवं च भो भगो अघो अपूर्वस्य यस्य लोपः स्यात् हलि सर्वेषां मतेन इत्यर्थः।

यथा - भोस् + देवाः - भो देवाः।

भोस् + देवाः इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे भोर् देवाः इति जाते 'भो भगो अघो अपूर्वस्य योऽशि' इति सूत्रेण रेफस्य यत्वे भोय् देवाः इति जाते 'हलि सर्वेषाम्' इति सूत्रेण यकारस्य लोपे भो देवाः इति रूपम्।

एवम् - भोस् + लक्ष्मीः - भो लक्ष्मीः।

भोस् + विद्वद्वृन्दः - भो विद्वद्वृन्दः।

भगोस् + नमस्ते - भगो नमस्ते।

अघोस् + याहि - अघो याहि।

देवास् + नम्याः - देवा नम्याः।

देवास् + यान्ति - देवा यान्ति।

हलि इति किम्?

परे हलः अभावे यकारलोपः विकल्पेन भवति।

यथा - देवास् + इह - देवा इह, देवायिह।

### ६. रोऽसुपि। (८-२-६९)

रः असुपि इति पदच्छेदः। 'अहन्' इति सूत्रमनुवर्तते। तच्च लुप्तषष्ठीकं पदम्। रः इति प्रथमा एकवचनम्। एवं च अह्नो रेफादेशः स्यात् न तु सुपि इति सूत्रार्थः।

यथा - अहन् + अहः - अहरहः।

अहन् + अहः इति स्थिते 'रोऽसुपि' इति सूत्रेण नकारस्य रेफादेशे अहर् अहः - अहरहः इति रूपम्।

### ७. रो रि। (८-३-१४)

रः रि इति द्विपदं सूत्रम्। 'ढो ढे लोपः' इति सूत्रात् लोपः इत्यनुवर्तते। रः इति षष्ठी। रि इति सप्तमी। एवं च रेफस्य रेफे परे लोपः स्यादिति सूत्रार्थः।

### ८. द्रलोपे पूर्वस्य दीर्घोऽणः। (६-३-१११)

द्रलोपे पूर्वस्य दीर्घः अणः इति पदच्छेदः। ढश्च रश्च द्रौ, तौ लोपयतीति द्रलोपः, तस्मिन् द्रलोपे। ढकाररेफयोः लोपनिमित्ते इत्यर्थः। 'ढो ढे लोपः', 'रो रि' इति सूत्राभ्यां ढकाररेफयोः लोपनिमित्तौ वर्णौ ढकाररेफौ एव इति ज्ञायते। एवं च ढरेफौ लोपयति इति तथा, तस्मिन् वर्णे अर्थात् ढकारे रेफात्मके परे पूर्वस्याणो दीर्घः स्यादिति सूत्रार्थः।

यथा - पुनर् + रमते -पुना रमते।

पुनर् + रमते इति स्थिते 'रो रि' इति सूत्रेण प्रथमस्य रेफस्य लोपे पुन रमते इति जाते 'द्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण पूर्वस्य अकारस्य दीर्घे पुना रमते इति रूपम्।

एवम् - हरिस् + रम्यः - हरी रम्यः।

हरिर् रम्यः - 'ससजुषो रुः'।

हरि रम्यः - 'रो रि'।

हरी रम्यः - 'द्रलोपे पूर्वस्य दीर्घोऽणः'।

२. शम्भुस् + राजते - शम्भू राजते।

### ९. विप्रतिषेधे परं कार्यम्। (१-४-२)

विप्रतिषेधे परं कार्यम् इति त्रिपदं सूत्रम्। एवं च तुल्यबलविरोधे सति परं कार्यं स्यादिति सूत्रार्थः।

यथा - मनस् + रथः - मनोरथः।

मनस् + रथः इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे मनर् रथः इति जाते 'हशि च' इति सूत्रेण उत्वे, 'रो रि' इति सूत्रेण रेफलोपे च युगपत् प्राप्ते 'विप्रतिषेधे परं कार्यम्' इति सूत्रेण परसूत्रेण लोपे प्राप्ते 'पूर्वत्रासिद्धम्' इति सूत्रेण 'रो रि' इत्यसिद्धत्वात् 'हशि च' इति सूत्रेण रेफस्य उत्वे मन उ रथः इति जाते 'आद्गुणः' इति सूत्रेण गुणे ओकारैकादेशे मनोरथः इति रूपम्।

- - - - -

# MODULE - III

# प्रक्रियां कुरुत।

## अकारान्तः पुल्लिङ्गः रामशब्दः।

### १. प्रथमा एकवचनम् - राम + सु - रामः।

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् प्रथमाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण सुप्रत्ययः। राम + सु इति स्थिते उकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायां लोपः। राम स् इति स्थिते 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सकारस्य रुत्वे राम र् इति जाते 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे रामः इति रूपम्।

### २. प्रथमा द्विवचनम् - राम + औ - रामौ।

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् प्रथमाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण औ प्रत्ययः। राम राम औ इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम औ इति जाते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति सूत्रेण तस्य निषेधे 'वृद्धिरेचि' इति सूत्रेण अकारौकारयोः स्थाने वृद्धिः - औकारैकादेशः - रामौ इति रूपम्।

### ३. प्रथमा बहुवचनम् - राम + जस् - रामाः।

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् प्रथमाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण जस् प्रत्ययः राम राम राम जस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे राम जस् इति जाते 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां लोपः। राम अस् इति जाते सकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां प्राप्तायां 'न विभक्तौ तुस्माः' इति सूत्रेण तस्य निषेधः। राम अस् इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण अकारयोः स्थाने पूर्वसवर्णदीर्घे रामास् इति जाते 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामाः इति रूपम्।

**४. सम्बोधनप्रथमा एकवचनम् - हे राम + सु - हे राम।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् सम्बोधनार्थे प्रथमाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण सुप्रत्ययः। हे राम + सु इति स्थिते 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां लोपे हे रामस् इति जाते 'एकवचनं सम्बुद्धिः' इति सूत्रेण प्रत्ययस्य सम्बुद्धिसंज्ञा, 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण हे राम इत्यस्याङ्गसंज्ञा च। तत्र 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण सम्बुद्ध्यवयवस्य सकारस्य लोपे हे राम इति रूपम्।

**५. सम्बोधनप्रथमा द्विवचनम् - हे राम + औ - हे रामौ।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् सम्बोधनार्थे प्रथमाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण औप्रत्ययः। हे राम राम औ इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे हे राम औ इति जाते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति सूत्रेण तस्य निषेधे 'वृद्धिरेचि' इति सूत्रेण अकारौकारयोः स्थाने वृद्धिः - औकारैकादेशः - हे रामौ इति रूपम्।

**३. सम्बोधनप्रथमा बहुवचनम् - हे राम + जस् - हे रामाः।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् सम्बोधनार्थे प्रथमाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण जस् प्रत्ययः। हे राम राम राम जस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे हे राम जस् इति जाते 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां लोपः। हे राम अस् इति जाते सकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां प्राप्तायां 'न विभक्तौ तुस्माः' इति सूत्रेण तस्य निषेधः। हे राम अस् इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण अकारयोः स्थाने पूर्वसवर्णदीर्घे हे रामास् इति जाते 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे हे रामाः इति रूपम्।

**७. द्वितीया एकवचनम् - राम + अम् - रामम्।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् द्वितीयाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति

सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण अम् प्रत्ययः। राम + अम् इति स्थिते 'हलन्त्यम्' इति सूत्रेण मकारस्य इत्संज्ञालोपे प्राप्ते 'न विभक्तौ तुस्माः' इति मकारस्य इत्संज्ञानिषेधः। 'अमि पूर्वः' इति सूत्रेण द्वेकयोरकारयोः पूर्वरूपे एकादेशे रामम् इति रूपम्।

**८. द्वितीया द्विवचनम् - राम + औट् - रामौ।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् द्वितीयाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण औट् प्रत्ययः। राम राम औट् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकेशेषे राम + औट् इति स्थिते 'हलन्त्यम्' इति सूत्रेण टकारस्य इत्संज्ञायां लोपः। राम औ इति जाते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति सूत्रेण तस्य निषेधे 'वृद्धिरेचि' इति सूत्रेण अकारौकारयोः स्थाने वृद्धिः औकारैकादेशः - रामौ इति रूपम्।

**९. द्वितीया बहुवचनम् - राम + शस् - रामान्।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् द्वितीयाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्या-म्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण शस् प्रत्ययः। राम राम राम शस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकेशेषे राम + शस् इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां लोपः। सकारस्य तु 'न विभक्तौ तुस्माः' इति सूत्रेण नेत्वम्। राम अस् इति जाते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे कृते रामास् इति जाते 'तस्माच्छसो न पुंसि' इति सूत्रेण सकारस्य नकारादेशे रामान् इति रूपम्।

**१०. तृतीया एकवचनम् - राम + टा - रामेण।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् तृतीयाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण टा प्रत्ययः। राम + टा इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् परस्य टा प्रत्ययस्य 'टाङसिङसामिनात्स्याः' इति सूत्रेण इनादेशः। राम इन इति जाते 'आद्गुणः' इति सूत्रेण अकारस्य इकारस्य च स्थाने गुणे एकारे एकादेशे रामेन इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे रामेण इति रूपम्।

**११. तृतीया द्विवचनम् - राम + भ्याम् - रामाभ्याम्।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् तृतीयाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्याम् प्रत्ययः। राम राम भ्याम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे राम + भ्याम् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, अकारान्तस्य तस्य यञादौ भ्याम् प्रत्यये परे 'सुपि च' इति सूत्रेण दीर्घे रामाभ्याम् इति रूपम्।

**१२. तृतीया बहुवचनम् - राम + भिस् - रामैः।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् तृतीयाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्या-म्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भिस् प्रत्ययः। राम राम राम भिस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे राम + भिस् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, अकारान्तात् तस्मात् परस्य भिस् प्रत्ययस्य 'अतो भिस् ऐस्' इति सूत्रेण ऐसादेशः। सः च अनेकालिति सर्वादेशः। राम ऐस् इति जाते 'वृद्धिरेचि' इति सूत्रेण अकारस्य ऐकारस्य च स्थाने वृद्धिः ऐकार एकादेशः। रमैस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामैः इति रूपम्।

**१३. चतुर्थी एकवचनम् - राम + ङे - रामाय।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् चतुर्थीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङे प्रत्ययः। राम + ङे इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् परस्य ङे प्रत्ययस्य 'ङेर्यः' इति सूत्रेण यादेशे राम य इति इति जाते 'स्थानिवदादेश' इति सूत्रेण यादेशस्य स्थानिवद्भावेन सुप्त्वमाश्रित्य 'सुपि च' इति सूत्रेण दीर्घे रामाय इति रूपम्।

**१४. चतुर्थी द्विवचनम् - राम + भ्याम् - रामाभ्याम् ।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् चतुर्थीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण

भ्याम् प्रत्ययः। राम राम भ्याम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे राम + भ्याम् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, अकारान्तस्य तस्य यञादौ भ्याम् प्रत्यये परे 'सुपि च' इति सूत्रेण दीर्घे रामाभ्याम् इति रूपम्।

**१५. चतुर्थी बहुवचनम् - राम + भ्यस् - रामेभ्यः।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् चतुर्थीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्या-म्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्यस् प्रत्ययः। राम राम राम भ्यस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम + भ्यस् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् झलादौ बहुवचने भ्यस् प्रत्यये परे 'बहुवचने झल्येत्' इति सूत्रेण रामशब्दस्य एत्वे रामेभ्यस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामेभ्यः इति रूपम्।

**१६. पञ्चमी एकवचनम् - राम + ङसि - रामात्।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् पञ्चमीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङसि प्रत्ययः। राम + ङसि इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् परस्य ङसि प्रत्ययस्य 'टाङसिङसामिनात्स्याः' इति सूत्रेण आत् इत्यादेशः। राम + आत् इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे रामात् इति रूपम्।

**१७. पञ्चमी द्विवचनम् - राम + भ्याम् - रामाभ्याम् ।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् पञ्चमीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्याम् प्रत्ययः। राम राम भ्याम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे राम + भ्याम् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, अकारान्तस्य तस्य यञादौ भ्याम् प्रत्यये परे 'सुपि च' इति सूत्रेण दीर्घे रामाभ्याम् इति रूपम्।

**१८. पञ्चमी बहुवचनम् - राम + भ्यस् - रामेभ्यः ।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् पञ्चमीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्या-म्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्यस् प्रत्ययः। राम राम राम भ्यस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम + भ्यस् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् झलादौ बहुवचने भ्यस् प्रत्यये परे 'बहुवचने झल्येत्' इति सूत्रेण रामशब्दस्य एत्वे रामेभ्यस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामेभ्यः इति रूपम्।

**१९. षष्ठी एकवचनम् - राम + ङस् - रामस्य।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् षष्ठीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङस् प्रत्ययः। राम + ङस् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् परस्य ङस् प्रत्ययस्य 'टाङसिङसामिनात्स्याः' इति सूत्रेण स्य इत्यादेशे रामस्य इति रूपम्।

**२०. षष्ठी द्विवचनम् - राम + ओस् - रामयोः।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् षष्ठीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ओस् प्रत्ययः। राम राम ओस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम + ओस् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, 'ओसि च' इति सूत्रेण तस्य एकारादेशः। 'अलोऽन्त्यस्य' इति सूत्रेण अन्त्यस्य अकारस्य एकारः। रामे ओस् इति जाते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे रामयोस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामयोः इति रूपम्।

**२१. षष्ठी बहुवचनम् - राम + आम् - रामाणाम्।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् षष्ठीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्या-म्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण आम् प्रत्ययः। राम राम राम आम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम + आम् इति स्थिते 'न विभक्तौ तुस्माः' इति सूत्रेण मकारस्य नेत्वम्। तत्र च 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमः। नुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण नुट् आमः आद्यावयवः। राम + नाम् इति जाते 'नामि' इति सूत्रेण रामशब्दस्य अकारस्य दीर्घे रामानाम् इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे रामाणाम् इति रूपम्।

**२२. सप्तमी एकवचनम् - राम + ङि - रामे।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् सप्तमीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङि प्रत्ययः। राम + ङि इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङकारस्य इत्संज्ञायां लोपे राम इ इति जाते 'आद्गुणः' इति सूत्रेण अकारस्य इकारस्य च स्थाने गुणे एकारे एकादेशे रामे इति रूपम्।

**२३. सप्तमी द्विवचनम् - राम + ओस् - रामयोः।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् सप्तमीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ओस् प्रत्ययः। राम राम ओस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम + ओस् इति स्थिते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, 'ओसि च' इति सूत्रेण तस्य एकारादेशः। 'अलोऽन्त्यस्य' इति सूत्रेण अन्त्यस्य अकारस्य एकारः। रामे ओस् इति जाते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे रामयोस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रामयोः इति रूपम्।

**२४. सप्तमी बहुवचनम् - राम + सुप् - रामेषु।**

अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण 'कृत्तद्धितसमासाश्च' इति सूत्रेण वा प्रातिपदिकसंज्ञा। तस्मात् सप्तमीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण

बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्या-म्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण सुप् प्रत्ययः। राम राम राम सुप् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। राम + सुप् इति स्थिते 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां लोपः। राम सु इति जाते 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण रामशब्दस्य अङ्गसंज्ञायां, तस्मात् झलादौ बहुवचने सुप् प्रत्यये परे 'बहुवचने झल्येत्' इति सूत्रेण रामशब्दस्य अकारस्य एत्वे रामेसु इति जाते 'आदेशप्रत्यययोः' इति सूत्रेण प्रत्ययावयवस्य सकारस्य षत्वे रामेषु इति रूपम्।

**अकारान्तः स्त्रीलिङ्गः रमाशब्दः।**

**१. प्रथमा एकवचनम् - रमा + सु - रमा।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् प्रथमाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण सु प्रत्ययः। रमा + सु इति स्थिते 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां लोपः। रमा स् इति जाते 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रेण सकारलोपे रमा इति रूपम्।

**२. प्रथमा द्विवचनम् - रमा + औ - रमे।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् प्रथमाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण औ प्रत्ययः। रमा रमा औ इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + औ इति स्थिते 'औङ आपः' इति सूत्रेण औ प्रत्ययस्य शी इत्यादेशः। तस्य च 'स्थानिवदादेशः' इति सूत्रेण स्थानिवद्भावेन प्रत्ययत्वात् 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां लोपः। रमा ई इति जाते 'आद्गुणः' इति सूत्रेण आकारस्य ईकारस्य च स्थाने गुणे एकारे एकादेशे रमे इति रूपम्।

**३. प्रथमा बहुवचनम् - रमा + जस् - रमाः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् प्रथमाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण जस् प्रत्ययः। रमा रमा रमा जस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + जस् इति जाते 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां लोपे रमा अस् इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे रमास् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमाः इति रूपम्।

**४. सम्बोधनप्रथमा एकवचनम् - हे रमा + सु - हे रमे।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् सम्बोधनार्थे प्रथमाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण सु प्रत्ययः। हे रमा + सु इति स्थिते उकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायां लोपे हे रमा स् इति जाते 'सम्बुद्धौ च' इति सूत्रेण आबन्तस्य रमाशब्दस्य एत्वे हे रमे स् इति जाते 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण सकारलोपे हे रमे इति रूपम्।

**५. सम्बोधनप्रथमा द्विवचनम् - हे रमा + औ - हे रमे।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् संबोधनप्रथमाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण औ प्रत्ययः। हे रमा रमा औ इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे हे रमा + औ इति स्थिते 'औङ आपः' इति सूत्रेण औ प्रत्ययस्य शी इत्यादेशः। तस्य च 'स्थानिवदादेशः' इति सूत्रेण स्थानिवद्भावेन प्रत्ययत्वात् 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां लोपः। हे रमा ई इति जाते 'आद्गुणः' इति सूत्रेण आकारस्य ईकारस्य च स्थाने गुणे एकारे एकादेशे हे रमे इति रूपम्।

**६. सम्बोधनप्रथमा बहुवचनम् - हे रमा + जस् - हे रमाः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् संबेधनप्रथमाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्।' स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण जस् प्रत्ययः। हे रमा रमा रमा जस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे हे रमा + जस् इति जाते 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञायां लोपे हे रमा अस् इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे हे रमास् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे हे रमाः इति रूपम्।

**७. द्वितीया एकवचनम् - रमा + अम् - रमाम्।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् द्वितीयाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि- ........................................ + अम् इति स्थिते 'अमि पूर्वः' इति सूत्रेण पूर्वरूपे एकादेशे रमाम् इति रूपम्।

**८. द्वितीया द्विवचनम् - रमा + औट् - रमे।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् द्वितीयाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण औट् प्रत्ययः। रमा रमा औट् इत्यत्र 'सरूपाणामेकशेष ... + औट् इति जाते टकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपे रमा औ इति जाते 'औङ आपः' इति सूत्रेण औ प्रत्ययस्य शी इत्यादेशः। तस्य च 'स्थानिवदादेशः' इति सूत्रेण स्थानिवद्भावेन प्रत्ययत्वात् 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां लोपः। रमा ई इति जाते 'आद् गुणः' इति सूत्रेण आकारस्य ईकारस्य च स्थाने गुणे एकारे एकादेशे रमे इति रूपम्।

**९. द्वितीया बहुवचनम् - रमा + शस् - रमाः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् द्वितीयाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण शस् प्रत्ययः। रमा रमा रमा शस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + शस् इति जाते 'लशक्वतद्धिते' इति सूत्रेण शकारस्य इत्संज्ञायां लोपे रमा अस् इति जाते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे रमास् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमाः इति रूपम्।

**१०. तृतीया एकवचनम् - रमा + टा - रमया।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् तृतीयाविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण टा प्रत्ययः। रमा + टा इति स्थिते 'चुटू' इति सूत्रेण टकारस्य इत्संज्ञायां लोपः। रमा आ इति जाते 'आङि चापः' इति सूत्रेण आबन्तस्य रमाशब्दस्य (अन्त्यस्य आकारस्य) एत्वे रमे आ इति जाते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे रमया (रम्अय्आ) इति रूपम्।

**११. तृतीया द्विवचनम् - रमा + भ्याम् - रमाभ्याम्।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् तृतीयाविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्याम् प्रत्ययः। रमा रमा भ्याम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + भ्याम् रमाभ्याम् इति रूपम्।

**१२. तृतीया बहुवचनम् - रमा + भिस् - रमाभिः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् तृतीयाविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भिस् प्रत्ययः। रमा रमा रमा भिस् इत्यत्र .................................................................. + भिस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमाभिः इति रूपम्।

**१३. चतुर्थी एकवचनम् - रमा + ङे - रमायै।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् चतुर्थीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङे प्रत्ययः। रमा + ङे इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङकारस्य इत्संज्ञायां लोपः। रमा ए इति जाते 'याडापः' इति सूत्रेण आबन्तात् परस्य ङितः प्रत्ययस्य याडागमः। याटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण याट् ङितः आद्यावयवः। रमा या ए इति स्थिते 'वृद्धिरेचि' इति सूत्रेण आकारस्य एकारस्य च स्थाने वृद्धौ ऐकारे एकादेशे रमायै (रमाय् ऐ) इति रूपम्।

**१४. चतुर्थी द्विवचनम् - रमा + भ्याम् - रमाभ्याम्।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् चतुर्थीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्याम् प्रत्ययः। रमा रमा भ्याम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + भ्याम् रमाभ्याम् इति रूपम्।

**१५. चतुर्थी बहुवचनम् - रमा + भ्यस् - रमाभ्यः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् चतुर्थीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्यस् प्रत्ययः। रमा रमा रमा भ्यस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + भ्यस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमाभ्यः इति रूपम्।

**१६. पञ्चमी एकवचनम् - रमा + ङसि - रमायाः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् पञ्चमीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-

स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङसि प्रत्ययः। रमा + ङसि इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङकारस्य, 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इकारस्य च इत्संज्ञायां लोपः। रमा अस् इति स्थिते 'याडापः' इति सूत्रेण आबन्तात् परस्य ङितः प्रत्ययस्य (अस्) याडागमः। याटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। 'आद्यन्तौ टकितौ' इति सूत्रेण याट् ङितः आद्यावयवः। रमा या अस् इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे रमायास् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमायाः इति रूपम्।

**१७. पञ्चमी द्विवचनम् - रमा + भ्याम् - रमाभ्याम्।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् पञ्चमीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्याम् प्रत्ययः। रमा रमा भ्याम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + भ्याम् रमाभ्याम् इति रूपम्।

**१८. पञ्चमी बहुवचनम् - रमा + भ्यस् - रमाभ्यः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् पञ्चमीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण भ्यस् प्रत्ययः। रमा रमा रमा भ्यस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + भ्यस् इति स्थिते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमाभ्यः इति रूपम्।

**१९. षष्ठी एकवचनम् - रमा + ङस् - रमायाः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् षष्ठीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङस् प्रत्ययः। रमा + ङस् इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण ङकारस्य इत्संज्ञायां लोपः। रमा अस् इति स्थिते 'याडापः' इति सूत्रेण आबन्तात् परस्य ङितः प्रत्ययस्य (अस्) याडागमः। याटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। 'आद्यन्तौ टकितौ' इति सूत्रेण याट् ङितः आद्यावयवः। रमा या अस् इति जाते 'अकः सवर्णे दीर्घः'

**२०. षष्ठी द्विवचनम् - रमा + ओस् - रमयोः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् षष्ठीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ओस् प्रत्ययः। रमा रमा ओस् इत्यत्र 'सरूपाणामेकशेष [illegible] + ओस् इति स्थिते 'आङि चापः' इति सूत्रेण रमाशब्दस्य आकारस्य एत्वे रमे ओस् इति जाते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे रमयोस् (रमय् ओस्) इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमयोः इति रूपम्।

**२१. षष्ठी बहुवचनम् - रमा + आम् - रमाणाम्।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् षष्ठीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण आम् प्रत्ययः। रमा रमा रमा आम् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषः। रमा + आम् इति स्थिते 'न विभक्तौ तुस्माः' इति सूत्रेण मकारस्य नेत्वम्। तत्र च, 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमः। नुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण नुट् आमः आद्यावयवः। रमा नाम् (रमा न् आम्) इति जाते 'अटकुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे रमाणाम् इति रूपम्।

**२२. सप्तमी एकवचनम् - रमा + ङि - रमायाम्।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् सप्तमीविभक्तौ एकत्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ङि प्रत्ययः। रमा + ङि इति स्थिते 'ङेराम्नद्याम्नीभ्यः' इति सूत्रेण ङिप्रत्ययस्य आमादेशः। रमा आम् इति जाते 'याडापः' इति सूत्रेण याडागमः। याटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण याट् आमः आद्यावयवः। रमा या आम् इति जाते यकारात् परस्य आकारस्य आमः आकारेण सह 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे रमायाम् इति रूपम्।

**२३. सप्तमी द्विवचनम् - रमा + ओस् - रमयोः।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् सप्तमीविभक्तौ द्वित्वविवक्षायां 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रेण द्विवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-

स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण ओस् प्रत्ययः। रमा रमा ओस् इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमा + ओस् इति स्थिते 'आङि चापः' इति सूत्रेण रमाशब्दस्य आकारस्य एत्वे रमे ओस् इति जाते 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे रमयोस् (रमय् ओस्) इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे रमयोः इति रूपम्।

**२४. ........ ............. .... + सुप् - रमासु।**

आबन्तस्य रमाशब्दस्य 'ङ्याप्प्रातिपदिकात्' इति सूत्रेण अधिकारः। तस्मात् सप्तमीविभक्तौ बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। 'स्वौजसमौट्छष्टाभ्याम्भि-स्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण सुप् प्रत्ययः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। रमा रमा रमा सु इत्यत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे रमासु इति रूपम्।

# MODULE - IV

# भू धातु परस्मैपदम्।

## लट्

**१. ........................................ + तिप् - भवति।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे प्रथमपुरुषे कर्तुः एकत्वविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू + ति इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भ् अव् अ ति - भवति इति रूपम्।

**२. प्रथमपुरुष द्विवचनम् - भू + तस् - भवतः।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे प्रथमपुरुषे कर्तुः द्वित्वविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तसादेशः। भू + तस् इति स्थिते 'न विभक्तौ तुस्माः' इति सूत्रेण सकारस्य इत्वाभावः। 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तसः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ तस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ तस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवतस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे भवतः इति रूपम्।

**३. प्रथमपुरुष बहुवचनम् - भू + झि - भवन्ति।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे प्रथमपुरुषे कर्तुः बहुत्वविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य झि इत्यादेशः। भू + झि इति स्थिते 'झोऽन्तः' इति सूत्रेण झकारस्य अन्तादेशे भू अन्ति इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङ् प्रत्ययस्य सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य

च इत्संज्ञयोः लोपौ। भू अ अन्ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ अन्ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव अन्ति इति जाते 'अतो गुणे' इति सूत्रेण द्वयोरकारयोः पररूपे एकादेशे भवन्ति इति रूपम्।

**४. मध्यमपुरुष एकवचनम् - भू + सिप् - भवसि।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे युष्मच्छब्दसामानाधिकरण्ये मध्यमपुरुषे कर्तुः एकत्वविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य सिप् आदेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू + सि इति स्थिते 'तिङ्शि-त्सार्वधातुकम्' इति सूत्रेण सिप् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ सि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवसि इति रूपम्।

**५. मध्यमपुरुष द्विवचनम् - भू + थस् - भवथः।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे युष्मच्छब्दसामानाधिकरण्ये मध्यमपुरुषे कर्तुः द्वित्वविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थसादेशः। भू + थस् इति स्थिते 'न विभक्तौ तुस्माः' इति सूत्रेण सकारस्य इत्वाभावः। 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण थसः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ थस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ थस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवथस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे भवथः इति रूपम्।

**६. मध्यमपुरुष बहुवचनम् - भू + थ - भवथ।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे युष्मच्छब्दसामानाधिकरण्ये मध्यमपुरुषे कर्तुः बहुत्वविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थादेशः। भू + थ इति स्थिते 'न विभक्तौ तुस्माः' इति सूत्रेण सकारस्य इत्वाभावः। 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण

थः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ थ इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ थ इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवथ इति रूपम्।

**७. उत्तमपुरुष एकवचनम् - भू + मिप् - भवामि।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे अस्मच्छब्दसामानाधिकरण्ये उत्तमपुरुषे कर्तुः एकत्वाविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू + मि इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण मिप् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ मि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ मि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव मि इति जाते 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे भवामि इति रूपम्।

**८. उत्तमपुरुष द्विवचनम् - भू + वस् - भवावः।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे अस्मच्छब्दसामानाधिकरण्ये उत्तमपुरुषे कर्तुः द्वित्वाविवक्षायां 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य वसादेशः। सकारस्य 'न विभक्तौ तुस्माः' इति सूत्रेण इत्वाभावः । भू + वस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण वस् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ वस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ वस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव वस् इति जाते 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे भवावस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे भवावः इति रूपम्।

**९. उत्तमपुरुष बहुवचनम् - भू + मस् - भवामः।**

सत्तार्थवृत्तेः भू धातोः वर्तमानकालवृत्तित्वे 'वर्तमाने लट्' इति सूत्रेण लट्। लकारमात्रं शिष्यते। तत्र परस्मैपदे अस्मच्छब्दसामानाधिकरण्ये उत्तमपुरुषे कर्तुः बहुत्वाविवक्षायां

'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मसादेशः। सकारस्य 'न विभक्तौ तुस्माः' इति सूत्रेण इत्वाभावः । भू + मस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण मस् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ मस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव मस् इति जाते 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे भवामस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे भवामः इति रूपम्।

- - - - -

## लङ्।

### १. प्रथमपुरुष एकवचनम् - अभवत्।

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तिबादेशः। पकारः 'हलन्त्यम्' इति सूत्रेण इत्। अ भू ति इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिप् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अ भव् अति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभवत् इति रूपम्।

### १. प्रथमपुरुष द्विवचनम् - अभवताम्।

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तसादेशः। अ भू तस् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः तामादेशः। अ भू ताम् इति जाते

धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ ताम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ ताम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभवताम् इति रूपम्।

**३. प्रथमपुरुष बहुवचनम् - अभवन्।**

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य झि आदेशः। अ भू झि इति स्थिते झकारस्य 'झोऽन्तः' इति सूत्रेण अन्तादेशे अ भू अन्ति इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण अन्ति प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ अन्ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ अन्ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव अन्ति इति जाते 'अतो गुणे' इति सूत्रेण द्वयोरकारयोः पररूपे एकादेशे अभवन्ति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभवन्त् इत्यत्र 'संयोगान्तस्य लोपः' इति सूत्रेण संयोगान्तस्य तकारस्य लोपे अभवन् इति रूपम्।

**४. मध्यमपुरुष एकवचनम् - अभवः।**

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुष एकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य सिबादेशः। 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां लोपः। अ भू सि इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सिप् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ सि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभवसि इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभवस् इत्यत्र 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे अभवः इति रूपम्।

### ५. मध्यमपुरुष द्विवचनम् - अभवतम्।

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थसादेशः। अ भू थस् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थसः तमादेशः। अ भू तम् इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तम् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ तम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ तम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभवतम् इति रूपम्।

### ६. मध्यमपुरुष बहुवचनम् - अभवत।

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थादेशः। अ भू थ इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थः तादेशः। अ भू त इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण त प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ त इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ त इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभवत इति रूपम्।

### ७. उत्तमपुरुष एकवचनम् - अभवम्।

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मिबादेशः। अ भू मिप् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण मिपः अमादेशः। अ भू अम् इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण अम् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण

धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ अम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ अम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभवम् इति रूपम्।

**८. उत्तमपुरुष द्विवचनम् - अभवाव।**

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। उत्तमपुरुष द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण वस् प्रत्ययः। 'न विभक्तौ तुस्माः' इति सूत्रेण सकारस्य इत्वाभावः। अ भू वस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण वस् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ वस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ वस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव वस् इत्यत्र 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य दीर्घे अभवावस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारस्य लोपे अभवाव इति रूपम्।

**९. उत्तमपुरुष बहुवचनम् - अभवाम।**

भू धातोः अनद्यतनभूतेऽर्थे वर्तमानात् 'अनद्यतने लङ्' इति सूत्रेण लङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। उत्तमपुरुष बहुचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण मस् प्रत्ययः। 'न विभक्तौ तुस्माः' इति सूत्रेण सकारस्य इत्वाभावः। अ भू मस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण मस् प्रत्ययस्य सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। अ भू अ मस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अ भो अ मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव मस् इत्यत्र 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य दीर्घे अभवामस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारस्य लोपे अभवाम इति रूपम्।

- - - - -

## लुङ्।

### १. प्रथमपुरुष एकवचनम् - अभूत्।

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुष एकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तिप्। पकारस्य, 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। अ भू ति इति स्थिते 'च्लि लुङि' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच्। अ भू स् ति इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुकि अ भू ति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभूत् इति रूपम्।

### २. प्रथमपुरुष द्विवचनम् - अभूताम्।

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुष द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तस् प्रत्ययः। अ भू तस् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः तामादेशः। अ भू ताम् इति जाते 'च्लि लुङि' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच्। अ भू स् ताम् इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुकि अभूताम् इति रूपम्।

### ३. प्रथमपुरुष बहुवचनम् - अभूवन्।

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुष बहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य झि प्रत्ययः। अ भू झि इति स्थिते 'झोऽन्तः' इति सूत्रेण झस्य अन्तादेशः। अ भू अन्ति इति जाते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। 'आद्यन्तौ टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। अ भूव् अन्ति इति जाते 'च्लि लुङि' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच्, 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुक् - अभूवन्ति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे, 'संयोगान्तस्य लोपः' इति सूत्रेण तकारलोपे च अभूवन् इति रूपम्।

**४. मध्यमपुरुष एकवचनम् - अभूः।**

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य सिप्। पकारस्य, 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। अ भू सि इति स्थिते 'च्लि लुङि' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच्। अ भू स् सि इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुकि अ भू सि इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभूस् इति जाते सकारस्य रुत्वविसर्गे अभूः इति रूपम्।

**५. मध्यमपुरुष द्विवचनम् - अभूतम्।**

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुष द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थस् प्रत्ययः। अ भू थस् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थसः तमादेशः। अ भू तम् इति जाते 'च्लि लुङि' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच्। अ भू स् तम् इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुकि अभूतम् इति रूपम्।

**६. मध्यमपुरुष बहुवचनम् - अभूत।**

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुष बहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थ प्रत्ययः। अ भू थ इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थः तादेशः। अ भू त इति जाते 'च्लि लुङि' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच्। अ भू स् त इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुकि अभूत इति रूपम्।

**७. उत्तमपुरुष एकवचनम् - अभूवम्।**

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्।

'आद्यन्तौ टकितौ' इति सूत्रेण अडागमस्य टित्वात् सः धातोः आद्यावयवः। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मिप् प्रत्ययः। अ भू मिप् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण मिपः अमादेशः। अ भू अम् इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण सः धातोः अन्तावयवः। अ भूव् अम् इति जाते 'च्लि लुङि' इति सूत्रेण च्लिप्रत्ययः। तस्य 'च्लेः सिच्' इति सूत्रेण सिच्, 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुक् - अभूवम् इति रूपम्।

### ८. उत्तमपुरुष द्विवचनम् -अभूव।

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अडागमस्य टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण सः धातोः आद्यावयवः। उत्तमपुरुष द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य वस् प्रत्ययः। अ भू वस् इति स्थिते 'च्लि लुङिः' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच् प्रत्ययः। 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुक्। अ भू वस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारलोपे अभूव इति रूपम्।

### ९. उत्तमपुरुष बहुवचनम् - अभूम।

भू धातोः सामान्यभूतकालेऽर्थे वर्तमानात् 'लुङ्' इति सूत्रेण लुङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अडागमस्य टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण सः धातोः आद्यावयवः। उत्तमपुरुष बहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मस् प्रत्ययः। अ भू मस् इति स्थिते 'च्लि लुङिः' इति सूत्रेण च्लि प्रत्ययः, तस्य 'च्लेः सिच्' इति सूत्रेण सिच् प्रत्ययः। 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचः लुक्। अ भू मस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारलोपे अभूम इति रूपम्।

- - - - -

# लिट्

## १. प्रथमपुरुषैकवचनम् - बभूव।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। प्रथमपुरुषैकवचने ''तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तिबादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपः णलादेशः। णलौ 'चुटू' इति सूत्रेण णकारस्य, 'हलन्त्यम्' इति सूत्रेण लकारस्य च इत्संज्ञयोः लोपौ। भू अ इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। भूव् अ इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भूव् अ इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् अ इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भु भूव् अ इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भभूव् अ इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूव इति रूपम्।

## २. प्रथमपुरुष द्विवचनम् - बभूवतुः।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। प्रथमपुरुषद्विवचने ''तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तसादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तसः अतुसादेशः। भू अतुस् इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। भूव् अतुस् इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भूव् अतुस् इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् अतुस् इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भु भूव् अतुस् इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भभूव् अतुस् इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूवतुस् इति जाते सकारस्य रुत्वे विसर्गे बभूवतुः इति रूपम्।

### ३. प्रथमपुरुष बहुवचनम् - बभूवुः।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। प्रथमपुरुष बहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य झि आदेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण झेः उसादेशः। भू उस् इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। भूव् उस् इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भूव् उस् इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् उस् इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भु भूव् उस् इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भभूव् उस् इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूवुस् इति जाते सकारस्य रुत्वे विसर्गे बभूवुः इति रूपम्।

### ४. मध्यमपुरुषैकवचनम् - बभूविथ।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य सिप् आदेशः। तस्य च 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण थलादेशः। थलौ लकारः 'हलन्त्यम्' इति सूत्रेण इत्। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः, 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इट् च। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। भू इथ इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण सः धातोः अन्तावयवः। भूव् इथ इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भुव् इथ इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् इथ इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भु भूव् इथ इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भ भूव् इथ इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूविथ इति रूपम्।

### ५. मध्यमपुरुषद्विवचनम् - बभूवथुः।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। मध्यमपुरुषद्विवचने ''तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य

थसादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण थसः अथुसादेशः। भू अथुस् इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। भूव् अथुस् इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भूव् अथुस् इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् अथुस् इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भु भूव् अथुस् इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भभूव् अथुस् इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूवथुस् इति जाते सकारस्य रुत्वे विसर्गे च बभूवथुः इति रूपम्।

**६. मध्यमपुरुष बहुवचनम् - बभूव।**

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। मध्यमपुरुषबहुवचने ''तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण थः अ इत्यादेशः। भू अ इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। भूव् अ इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भूव् अ इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् अ इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भू भूव् अ इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भभूव् अ इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूव इति रूपम्।

**७. उत्तमपुरुषैकवचनम् - बभूव।**

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। उत्तमपुरुषैकवचने ''तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मिबादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः। 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण मिपः णलादेशः। णलौ 'चुटू' इति सूत्रेण णकारस्य, 'हलन्त्यम्' इति सूत्रेण लकारस्य च इत्संज्ञयोः लोपौ। भू अ इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ

टकितौ' इति सूत्रेण वुगागमः धातोः अन्तावयवः। भूव् अ इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भूव् अ इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् अ इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भू भूव् अ इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भभूव् अ इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूव इति रूपम्।

### ८. उत्तमपुरुषद्विवचनम् - बभूविव।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। उत्तमपुरुष द्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य वस् आदेशः। तस्य च 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण वादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः, 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इट् च। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। भू इव इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण सः धातोः अन्तावयवः। भूव् इव इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भुव् इव इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् इव इति जाते 'ह्रस्वः' इति सूत्रेण अभ्यासह्रस्वे भु भूव् इव इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भ भूव् इव इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूविव इति रूपम्।

### ९. उत्तमपुरुषबहुवचनम् - बभूविम।

भू धातोः भूतानद्यतनपरोक्षार्थवृत्तित्वे 'परोक्षे लिट्' इति सूत्रेण लिट्। लकारमात्रं शिष्यते। उत्तमपुरुष बहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य मस् आदेशः। तस्य च 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण मादेशः। 'लिट् च' इति सूत्रेण लिडादेशस्य तिङः आर्धधातुकत्वात् शबभावः, 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इट् च। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। भू इम इति स्थिते 'भुवो वुग्लुङ्लिटोः' इति सूत्रेण धातोः वुगागमः। वुकि ककारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। वुगागमस्य कित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण सः धातोः अन्तावयवः। भूव् इम इति जाते एकाचो द्वे प्रथमस्य इत्यनुवर्त्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण प्रथमस्य एकाचः भूव् इत्यस्य द्वित्वम्। भूव् भुव् इम इति जाते 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्य अभ्याससंज्ञायां 'हलादि शेषः' इति सूत्रेण आद्यः हल् शिष्यते। भू भूव् इम इति जाते 'ह्रस्वः'

इति सूत्रेण अभ्यासह्रस्वे भु भूव् इम इति जाते 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अत्वे भ भूव् इम इति जाते 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वे बभूविम इति रूपम्।

- - - - -

## विधिलिङ्।

### १. प्रथमपुरुषैकवचनम् - भवेत्।

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। प्रथमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लकारस्य तिप्। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू ति इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव ति इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् ति इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् ति इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् ति इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारलोपे भवेति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे भवेत् इति रूपम्।

### २. प्रथमपुरुषद्विवचनम् - भवेताम्।

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तसादेशः। तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तामादेशः। भू ताम् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ ताम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ ताम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव ताम् इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् ताम् इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् ताम् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् ताम् इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारलोपे भवेताम् इति रूपम्।

**३. प्रथमपुरुषबहुवचनम् - भवेयुः।**

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य झि आदेशः। भू झि इति जाते 'झेर्जुस्' इति सूत्रेण झिप्रत्ययस्य जुसादेशः। जकारस्य 'चुटू' इति सूत्रेण इत्संज्ञायां लोपः। भू उस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ उस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ उस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव उस् इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् उस् इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् उस् इति जाते 'आद्गुणः' इति गुणे भवेयुस् इति जाते सकारस् रुत्वे विसर्गे भवेयुः इति रूपम्।

**४. मध्यमपुरुषैकवचनम् - भवेः।**

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लकारस्य सिप्। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू सि इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ सि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव सि इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् सि इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् सि इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् सि इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारलोपे भवेसि इति जाते 'इतश्च' इति सूत्रेण इकारलोपे भवेस् इति जाते सकारस्य रुत्वे विसर्गे च भवेः इति रूपम्।

**५. मध्यमपुरुषद्विवचनम् - भवेतम्।**

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थसादेशः। तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तमादेशः। भू तम् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ तम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ तम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव तम् इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् तम् इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् तम् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् तम् इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारलोपे भवेतम् इति रूपम्।

**६. मध्यमपुरुषबहुवचनम् - भवेत।**

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तसादेशः। तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तादेशः। भू त इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ त इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ त इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव त इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् त इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् त इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् त इति जाते'लोपो व्योर्वलि' इति सूत्रेण यकारलोपे भवेत इति रूपम्।

**७. उत्तमपुरुषैकवचनम् - भवेयम्।**

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-

तांझथासाथांध्वमिड्वहिमहिङ्’ इति सूत्रेण लकारस्य मिबादेशः। तस्य ‘तस्थस्थमिपां तान्तन्तामः’ इति सूत्रेण अमादेशः। भू अम् इति स्थिते ‘तिङ्शित्सार्वधातुकम्’ इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे ‘कर्तरि शप्’ इति सूत्रेण धातोः शप्। ‘लशक्वतद्धिते’ इति सूत्रेण शकारस्य, ‘हलन्त्यम्’ इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ अम् इति जाते ‘सार्वधातुकार्धधातुकयोः’ इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ अम् इति जाते ‘एचोऽयवायावः’ इति सूत्रेण ओकारस्य अवादेशे भव अम् इति जाते ‘यासुट् परस्मैपदेषूदात्तो ङिच्च’ इति सूत्रेण यासुडागमः। यासुटि टकारः ‘हलन्त्यम्’ इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् ‘आद्यन्तौ टकितौ’ इति सूत्रेण तिङ आद्यावयवः। भव यास् अम् इति जाते ‘अतो येयः’ इति सूत्रेण यासुटः इयादेशः। भव इय् अम् इति जाते ‘आद्गुणः’ इति सूत्रेण गुणे भवेयम् इति रूपम्।

### ८. उत्तमपुरुषद्विवचनम् - भवेव।

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् ‘विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्’ इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। उत्तमपुरुषद्विवचने ‘तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्’इति सूत्रेण लकारस्य वस् । भू वस् इति स्थिते ‘तिङ्शित्सार्वधातुकम्’ इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे ‘कर्तरि शप्’ इति सूत्रेण धातोः शप्। ‘लशक्वतद्धिते’ इति सूत्रेण शकारस्य, ‘हलन्त्यम्’ इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ वस् इति जाते ‘सार्वधातुकार्धधातुकयोः’ इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ वस् इति जाते ‘एचोऽयवायावः’ इति सूत्रेण ओकारस्य अवादेशे भव वस् इति जाते ‘यासुट् परस्मैपदेषूदात्तो ङिच्च’ इति सूत्रेण यासुडागमः। यासुटि टकारः ‘हलन्त्यम्’ इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् ‘आद्यन्तौ टकितौ’ इति सूत्रेण तिङ आद्यावयवः। भव यास् वस् इति जाते ‘अतो येयः’ इति सूत्रेण यासुटः इयादेशः। भव इय् वस् इति जाते ‘आद्गुणः’ इति सूत्रेण गुणे भवेय् वस् इति जाते ‘लोपो व्योर्वलि’ इति सूत्रेण यकारलोपे भवेवस् इति जाते ‘नित्यं ङितः’ इति सूत्रेण सकारलोपे भवेव इति रूपम्।

### ९. उत्तमपुरुषबहुवचनम् - भवेम।

भू धातोः विध्यादिष्वर्थेषु वर्तमानात् ‘विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्’ इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। उत्तमपुरुषबहुवचने ‘तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्’इति सूत्रेण लकारस्य मस् । भू मस् इति स्थिते ‘तिङ्शित्सार्वधातुकम्’ इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे ‘कर्तरि शप्’ इति सूत्रेण धातोः शप्। ‘लशक्वतद्धिते’ इति सूत्रेण शकारस्य, ‘हलन्त्यम्’ इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ मस् इति जाते

'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव मस्  इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। यासुटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटि टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङ आद्यावयवः। भव यास् मस् इति जाते 'अतो येयः' इति सूत्रेण यासुटः इयादेशः। भव इय् मस् इति जाते 'आद्गुणः' इति सूत्रेण गुणे भवेय् मस् इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारलोपे भवेमस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारलोपे भवेम इति रूपम्।

- - - - -

## आशीर्लिङ्।

### १. प्रथमपुरुषैकवचनम् - भूयात्।

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। प्रथमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तिप्। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू ति इति स्थिते 'लिङाशिषि' इति सूत्रेण तिबादीनामार्धधातुकत्वात् शबभावः। 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भू यास् ति इति स्थिते 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारलोपे भू या ति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे भूयात् इति रूपम्।

### २. प्रथमपुरुषद्विवचनम् - भूयास्ताम्।

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य तस्। तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तामादेशः। भू ताम् इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भूयास्ताम् इति रूपम्।

### ३. प्रथमपुरुषबहुवचनम् - भूयासुः।

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य झि आदेशः। 'झेर्जुस्' इति सूत्रेण झेः जुसादेशः। जकारः 'चुटू' इति सूत्रेण इत्। भू उस् इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः

उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भू यास् उस् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे भूयास् उर् इति जाते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे भूयासुः इति रूपम्।

**४. मध्यमपुरुषैकवचनम् - भूयाः।**

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण सिप् आदेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू सि इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भू यास् सि इति जाते 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारलोपे भूयासि इति जाते 'इतश्च' इति सूत्रेण इकारलोपे भूयास् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे भूयार् इति जाते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे भूयाः इति रूपम्।

**५. मध्यमपुरुषद्विवचनम् - भूयास्तम्।**

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थस् । तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तमादेशः। भू तम् इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भूयास्तम् इति रूपम्।

**६. मध्यमपुरुषबहुवचनम् - भूयास्त।**

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य थ। तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तादेशः। भू त इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भूयास्त इति रूपम्।

**७. उत्तमपुरुषैकवचनम् - भूयासम्।**

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकारस्य

मिप्। तस्य 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण अमादेशः। भू अम् इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भूयासम् इति रूपम्।

**८. उत्तमपुरुषद्विवचनम् - भूयास्व।**

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। उत्तमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण वस् प्रत्ययः। भू वस् इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भू यास् वस् इति जाते 'नित्यं ङितः' इति सूत्रेण अन्त्यस्य सकारस्य लोपे भूयास्व इति रूपम्।

**९. उत्तमपुरुषबहुवचनम् - भूयास्म।**

भू धातोः आशीरर्थे वर्तमानात् 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङ्। लकारमात्रं शिष्यते। उत्तमपुरुषबहुचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण मस् प्रत्ययः। भू मस् इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्, उकारः उच्चारणार्थः। यासुटः टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण तिङः आद्यावयवः। भू यास् मस् इति जाते 'नित्यं ङितः' इति सूत्रेण अन्त्यस्य सकारस्य लोपे भूयास्म इति रूपम्।

- - - - -

## लोट्

**१. प्रथमपुरुषैकवचनम् - भवतु, भवतात्।**

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। प्रथमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य तिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू ति इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवति इति जाते 'एरुः' इति सूत्रेण इकारस्य उकारादेशे भवतु इति रूपम्। आशिषि पुनः 'तुह्योस्तातङाशिष्यन्यतरस्याम्' इति सूत्रेण तु इत्यस्य विकल्पेन तातङादेशः। ङकारः 'हलन्त्यम्' इति सूत्रेण इत्, अकारः उच्चारणार्थः। तातङादेशस्य ङित्वात् अन्तावयवत्वे भवतात् इत्यपि रूपम्।

**२. प्रथमपुरुषद्विवचनम् - भवताम्।**

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य तसादेशः। भू तस् इति स्थिते 'लोटो लङ्वत्' इति सूत्रेण लोटः लङ्वदतिदेशात् 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः तामादेशः। भू ताम् इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ ताम् इति जाते 'सार्वधातुकार्ध-धातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ ताम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवताम् इति रूपम्।

**३. प्रथमपुरुषबहुवचनम् - भवन्तु।**

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य झि इत्यादेशः। 'झोf़न्तः' इति सूत्रेण झकारस्य अन्तादेशे भू अन्ति इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ अन्ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ अन्ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव अन्ति इति जाते 'अतो गुणे ' इति सूत्रेण द्वयोरकारयोः पररूपे भवन्ति इति जाते 'एरुः' इति सूत्रेण इकारस्य उकारादेशे भवन्तु इति रूपम्।

**४. मध्यमपुरुषैकवचनम् - भव, भवतात्।**

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य सिप्। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू सि इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ सि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवसि। तत्र 'सेर्ह्यपिच्च' इति सूत्रेण सेः हि इत्यादेशे भव हि इति जाते 'अतो हेः' इति सूत्रेण हेः लुक् - भव इति रूपम्। आशिषि तु 'तुह्योस्तातङाशिष्यन्यतरस्याम्'

इति सूत्रेण हि इत्यस्य विकल्पेन तातङादेशः। तत्र ङकारः 'हलन्त्यम्' इति सूत्रेण इत्, अकारः उच्चारणार्थः। भवतात् इत्यपि रूपम्।

### ५. मध्यमपुरुषद्विवचनम् - भवतम्।

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य थसादेशः। भू थस् इति स्थिते 'लोटो लङ्वत्' इति सूत्रेण लोटः लङ्वदतिदेशात् 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थसः तमादेशः। भू तम् इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ तम् इति जाते 'सार्वधातुकार्ध-धातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ तम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवतम् इति रूपम्।

### ६. मध्यमपुरुषबहुवचनम् - भवत।

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य थादेशः। भू थ इति स्थिते 'लोटो लङ्वत्' इति सूत्रेण लोटः लङ्वदतिदेशात् 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थः तादेशः। भू त इति जाते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ त इति जाते 'सार्वधातुकार्ध-धातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ त इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवत इति रूपम्।

### ७. उत्तमपुरुषैकवचनम् - भवानि।

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण मिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू मि इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ मि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ मि इति जाते

'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव मि इति जाते 'मेर्निः' इति सूत्रेण मेः नि इत्यादेशः। भव नि इति जाते 'आडुत्तमस्य पिच्च' इति सूत्रेण नेः आडागमः। तत्र टकारः 'हलन्त्यम्' इति सूत्रेण इत्। तत्र टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण आडागमः नेः आद्यावयवः। भव आनि इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे भवानि इति रूपम्।

**५. उत्तमपुरुषद्विवचनम् - भवाव।**

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। उत्तमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य वसादेशः। भू वस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ वस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ वस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव वस्। 'लोटो लङ्वत्' इति सूत्रेण लङ्वद्भावात् 'नित्यं ङितः' इति सूत्रेण सकारलोपे भव व इति जाते 'आडुत्तमस्य पिच्च' इति सूत्रेण वस्य आडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्। तत्र टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण आडागमः वस्य आद्यावयवः। भव आव इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे भवाव इति रूपम्।

**९. उत्तमपुरुष बहुवचनम् - भवाम।**

भू धातोः 'लोट् च' इति सूत्रेण विध्यादिष्वर्थेषु 'आशिषि लिङ्लोटौ' इति सूत्रेण आशिषि च लोट्। लकारमात्रं शिष्यते। उत्तमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ता-तांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लकरास्य मसादेशः। भू मस् इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण तिङः सार्वधातुकसंज्ञायां, तस्मिन् परे 'कर्तरि शप्' इति सूत्रेण धातोः शप्। 'लशक्वतद्धिते' इति सूत्रेण शकारस्य, 'हलन्त्यम्' इति सूत्रेण पकारस्य च इत्संज्ञयोः लोपौ। भू अ मस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो अ मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव मस्। 'लोटो लङ्वत्' इति सूत्रेण लङ्वद्भावात् 'नित्यं ङितः' इति सूत्रेण सकारलोपे भव म इति जाते 'आडुत्तमस्य पिच्च' इति सूत्रेण मस्य आडागमः। टकारः 'हलन्त्यम्' इति सूत्रेण इत्। तत्र टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण आडागमः मस्य आद्यावयवः। भव आम इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे भवाम इति रूपम्।

- - - - -

# लुट्

## १. प्रथमपुरुषैकवचनम् - भविता।

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। प्रथमपुरुषैकवचने ''तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य तिबादेशः। तस्य च 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण डादेशः। डकारस्य 'चुटू' इति सूत्रेण इत्संज्ञायां लोपः। भू आ इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् आ इति जाते तासेः आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। तस्य टित्वात् 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् आ इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव् इतास् आ इति जाते डाप्रत्ययस्य डित्वसामर्थ्यात् भसंज्ञाभावेऽपि भवितास् आ इत्यत्र टिलोपे (आस्) भविता (भवित् आ) इति रूपम्।

## २. प्रथमपुरुषद्विवचनम् - भवितारौ।

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य तसादेशः। भू तस् इति स्थिते 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण तसः रौ इत्यादेशः। भू रौ इति जाते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् रौ इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् रौ इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् रौ इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव् इतास् रौ इत्यत्र 'रि च' इति सूत्रेण सकारलोपे भवितारौ इति रूपम्।

## ३. प्रथमपुरुषबहुवचनम् - भवितारः।

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य झि आदेशः। भू झि इति स्थिते 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण झेः रस् इत्यादेशः। भू रस् इति जाते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् रस् इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः।

इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् रस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् रस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भव् इतास् रस् इत्यत्र 'रि च' इति सूत्रेण सकारलोपे भवितारस् इति जाते सकारस्य रुत्वविसर्गे भवितारः इति रूपम् ।

**४. मध्यमपुरुषैकवचनम् - भवितासि।**

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य सिप्। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू सि इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् सि इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् सि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवितास् सि। अत्र 'तासस्त्योर्लोपः' इति सूत्रेण तासेः सकारस्य लोपे भवितासि इति रूपम्।

**५. मध्यमपुरुषद्विवचनम् - भवितास्थः।**

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य थस् । भू थस् इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् थस् इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् थस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् थस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवितास् थस्। अत्र अन्त्यस्य सकारस्य रुत्वे विसर्गे च भवितास्थः इति रूपम्।

**६. मध्यमपुरुषबहुवचनम् - भवितास्थ।**

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य थ। भू थ इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक

इत्' इति सूत्रेण इत्। भू तास् थ इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् थ इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् थ इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवितास्थ इति रूपम्।

**७. उत्तमपुरुषैकवचनम् - भवितास्मि।**

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य मिप्। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू मि इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् मि इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् मि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् मि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवितास्मि इति रूपम्।

**८. उत्तमपुरुषद्विवचनम् - भवितास्वः।**

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। उत्तमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य वस् । भू वस् इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् वस् इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् वस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् वस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवितास् वस्। अत्र अन्त्यस्य सकारस्य रुत्वे विसर्गे च भवितास्वः इति रूपम्।

**९. उत्तमपुरुषबहुवचनम् - भवितास्मः।**

भू धातोः अनद्यतनभविष्यत्यर्थे वर्तमानात् 'अनद्यतने लुट्' इति सूत्रेण लुट्। लकारमात्रं शिष्यते। उत्तमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य मस् । भू मस् इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः तासिप्रत्ययः। इकारः 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्। भू तास् मस् इति जाते तासेरार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण

तासेः इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः तासेः आद्यावयवः। भू इतास् मस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इतास् मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भवितास् मस्। अत्र अन्त्यस्य सकारस्य रुत्वे विसर्गे च भवितास्मः इति रूपम्।

- - - - -

## लृट्

**१. प्रथमपुरुषैकवचनम् - भविष्यति।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। प्रथमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य तिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू ति इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य ति इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य ति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य ति। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्यति इति रूपम्।

**२. प्रथमपुरुषद्विवचनम् - भविष्यतः।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य तसादेशः। भू तस् इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य तस् इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य तस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य तस् जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य तस्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्य तस् इति जाते सकारस्य रुत्वविसर्गे भविष्यतःइति रूपम्।

**३. प्रथमपुरुषबहुवचनम् - भविष्यन्ति।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य झि इत्यादेशः। 'झोऽन्तः'

इति सूत्रेण झस्य अन्तादेशः। भू अन्ति इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य अन्ति इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य अन्ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य अन्ति इति जाते 'एचोऽयवायावः' इति सूत्रेण भविस्य अन्ति। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्य अन्ति इति जाते 'अतो गुणे' इति सूत्रेण द्वयोरकारयोः पररूपे एकादेशे भविष्यन्ति इति रूपम्।

**४. मध्यमपुरुषैकवचनम् - भविष्यसि।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य सिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू सि इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य सि इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य सि जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य सि। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्यसि इति रूपम्।

**५. मध्यमपुरुषद्विवचनम् - भविष्यथः।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य थसादेशः। भू थस् इति स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य थस् इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य थस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य थस् जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य थस्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्य थस् इति जाते सकारस्य रुत्वविसर्गे भविष्यथः इति रूपम्।

**६. मध्यमपुरुषबहुवचनम् - भविष्यथ।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य थादेशः। भू थ इति

स्थिते 'स्यतासीलृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य थ इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य थ इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य थ जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य थ। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्यथ इति रूपम्।

**७. उत्तमपुरुषैकवचनम् - भविष्यामि।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य मिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। भू मि इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य मि इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य मि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य मि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य मि। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्य मि इति जाते 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे भविष्यामि इति रूपम्।

**८. उत्तमपुरुषद्विवचनम् - भविष्यावः।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। उत्तमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य वसादेशः। भू वस् इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य वस् इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य वस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य वस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य वस्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्य वस् इति जाते 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे भविष्यावस् इति जाते सकारस्य रुत्वविसर्गे भविष्यावः इति रूपम्।

**९. उत्तमपुरुषबहुवचनम् - भविष्यामः।**

भू धातोः भविष्यत्यर्थे वर्तमानात् 'लृट् शेषे च' इति सूत्रेण लृट्। लकारमात्रं शिष्यते। उत्तमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य मसादेशः। भू मस्

इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। भू स्य मस् इति जाते स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। भू इस्य मस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे भो इस्य मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे भविस्य मस्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे भविष्य मस् इति जाते 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे भविष्यामस् इति जाते सकारस्य रुत्वविसर्गे भविष्यामः इति रूपम्।

- - - - -

## लृङ्

### १. प्रथमपुरुषैकवचनम् - अभविष्यत्।

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वड्उदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लस्य तिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। अ भू ति इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अभू स्य ति इति जाते स्यप्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव् इस्य ति। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यति इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभविष्यत् इति रूपम्।

### २. प्रथमपुरुषद्विवचनम् - अभविष्यताम्।

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वड्उदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लस्य तसादेशः। अ भू तस् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः तामादेशः। अभू ताम् इति स्थिते 'स्यतासी

लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अ भू स्य ताम् इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य ताम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य ताम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव् इस्य ताम्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यताम् इति रूपम्।

**३. प्रथमपुरुषबहुवचनम् - अभविष्यन्।**

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। प्रथमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य झि आदेशः। अ भू झि इति स्थिते 'झोऽन्तः' इति सूत्रेण झस्य अन्तादेशः। अभू अन्ति इति जाते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अभू स्य अन्ति इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य अन्ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य अन्ति इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव् इस्य अन्ति। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्य अन्ति इति जाते 'अतो गुणे' इति सूत्रेण द्वयोरकारयोः पररूपे एकादेशे अभविष्यन्ति। 'इतश्च' इति सूत्रेण इकारलोपे अभविष्यन्त इति जाते 'संयोगान्तस्य लोपः' इति सूत्रेण संयोगान्तस्य तकारस्य लोपे अभविष्यन् इति रूपम्।

**४. मध्यमपुरुषैकवचनम् - अभविष्यः।**

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लस्य सिबादेशः। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपः। अ भू सि इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अभू स्य सि इति जाते स्यप्रत्ययस्य 'आर्धधातुकं शेषः' इति सूत्रेण आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण स्यप्रत्ययस्य इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्।

अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य सि इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य सि इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभविस्य सि। तत्र 'आदेशप्रत्यययोः' इति सूत्रेण प्रत्ययावयवस्य सकारस्य षत्वे अभविष्य सि इति जाते 'इतश्च' इति सूत्रेण इकारलोपे अभविष्य स् इति जाते 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वे अभविष्य र् इति जाते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे अभविष्यः इति रूपम्।

**५. मध्यमपुरुषद्विवचनम् - अभविष्यतम्।**

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लस्य थसादेशः। अ भू थस् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः तमादेशः। अ भू तम् इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अ भू स्य तम् इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अ भू इस्य तम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य तम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव् इस्य तम्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यतम् इति रूपम्।

**६. मध्यमपुरुषबहुवचनम् - अभविष्यत।**

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। मध्यमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लस्य थादेशः। अ भू थ इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थः तादेशः। अ भू त इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अ भू स्य त इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अ भू इस्य त इति जाते

'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य त इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव् इस्य त। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्यत इति रूपम्।

**७. उत्तमपुरुषैकवचनम् - अभविष्यम्। प्रथमपुरुषद्विवचनवत्।**

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। उत्तमपुरुषैकवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'इति सूत्रेण लस्य मिबादेशः। अ भू मिप् इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण मिपः अमादेशः। अभू अम् इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अ भू स्य अम् इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य अम् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य अम् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभव् इस्य अम्। प्रत्ययावयवस्य सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अभविष्य अम् इति जाते 'अमि पूर्वः' इति सूत्रेण पूर्वरूपे अभविष्यम् इति रूपम्।

**८. उत्तमपुरुषद्विवचनम् - अभविष्याव।**

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। उत्तमपुरुषद्विवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य वसादेशः। अ भू वस् इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अभू स्य वस् इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य वस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य वस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभविस्य वस्। तत्र 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे अभविष्यावस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारलोपे अभविस्याव इति जाते 'आदेशप्रत्यययोः' इति सूत्रेण प्रत्ययावयवस्य सकारस्य षत्वे अभविष्याव इति रूपम्।

## ९. उत्तमपुरुषबहुवचनम् - अभविष्याम।

भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ्। लकारमात्रं शिष्यते। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण धातोः अडागमः। अटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण अडागमः धातोः आद्यावयवः। उत्तमपुरुषबहुवचने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण लस्य मसादेशः। अ भू मस् इति स्थिते 'स्यतासी लृलुटोः' इति सूत्रेण शबपवादः स्यप्रत्ययः। अभू स्य मस् इति जाते 'आर्धधातुकं शेषः' इति सूत्रेण स्यप्रत्ययस्य आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमः। इटि टकारः 'हलन्त्यम्' इति सूत्रेण इत्। अतः 'आद्यन्तौ टकितौ' इति सूत्रेण इडागमः स्यप्रत्ययस्य आद्यावयवः। अभू इस्य मस् इति जाते 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण ऊकारस्य गुणे ओकारे अभो इस्य मस् इति जाते 'एचोऽयवायावः' इति सूत्रेण ओकारस्य अवादेशे अभविस्य मस्। तत्र 'अतो दीर्घो यञि' इति सूत्रेण अकारान्तस्य अङ्गस्य दीर्घे अभविष्यामस् इति जाते 'नित्यं ङितः' इति सूत्रेण सकारलोपे अभविस्याम इति जाते 'आदेशप्रत्यययोः' इति सूत्रेण प्रत्ययावयवस्य सकारस्य षत्वे अभविष्याम इति रूपम्।

-.-.-.-

# MODULE - V

# तर्कसङ्ग्रहः

## दीपिकाव्याख्योपेतः।

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः।। १।।

## दीपिका

विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम्।
टीकां शिशुहितां कुर्वे तर्कसङ्ग्रहदीपिकाम्।।

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्ट-देवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितग्रन्थादौ प्रतिजानीते - निधायेति।

ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति, मङ्गलं कृतेऽपि कादम्बर्यादौ समाप्त्यदर्शनात्, मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनाच्च अन्वयव्यतिरेकव्यभिचारादिति चेन्न, कादम्बर्यादौ विघ्नबाहुल्यात्समाप्त्यभावः, किरणावल्यादौ तु ग्रन्थाद्बहिरेव मङ्गलं कृतमतो न व्यभिचारः। ननु मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न, शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात्। तथाहि - मङ्गलम् वेदबोधितकर्तव्यताकम् अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत्। भोजनादौ व्यभिचारवारणायालौकिकेति, रात्रिश्राद्धादौ व्यभिचारवारणायाविगीतेति, शिष्टपदं स्पष्टार्थम्। 'न कुर्यान्निष्फलं कर्म' इति जलताडनादेरपि निषिद्धत्वादिति।

तर्कसङ्ग्रह इति। तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः द्रव्यादिसप्तपदार्थाः, तेषां संग्रहः - सङ्क्षेपेण स्वरूपकथनं क्रियत इत्यर्थः। कस्मै प्रयोजनायेत्यत आह - सुखबोधायेति। सुखेनानायासेन बोधः पदार्थज्ञानं तस्मै इत्यर्थः। ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वोऽयं ग्रन्थः क्रियते इत्यत आह - बालानामिति। तेषामतिविस्तृतत्वात् बालानां बोधो न भवतीत्यर्थः। ग्रहणधारणपटुर्बालः, न तु स्तनन्धयः। किं कृत्वा क्रियत इत्यत आह - निधायेति। विश्वेशं जगन्नियन्तारं शिवं हृदि निधाय नितरां स्थापयित्वा सर्वदा तद्ध्यानपरो भूत्वेत्यर्थः। गुरूणां विद्यागुरूणां वन्दनं नमस्कारं विधाय कृत्वेत्यर्थः।

## (१) उद्देशप्रकरणम्।

पदार्थाः कति, कानि च तेषां नामानि?

**द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया-ऽभावाः सप्त पदार्थाः।**

**दीपिका** - पदार्थान् विभजते - द्रव्येति। पदस्यार्थः पदार्थः इति व्युत्पत्याभिधेयत्वंपदार्थ-सामान्यलक्षणम्। नन्वत्र विभागादेव सप्तत्वे सिद्धे सप्तपदग्रहणं व्यर्थमिति चेन्न, अधिकसंख्याव्यवच्छेदार्थकत्वात्।

नन्वतिरिक्तः पदार्थः प्रमितो न वा? नाद्यः - प्रमितस्य निषेधायोगात्, नान्त्यः - प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न, पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थकत्वात्। ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वमिति वक्तव्यम्, एवं च सप्तभिन्न-स्याप्रसिद्धत्वात्कथं सप्तान्यतमत्वव्याप्तिनिश्चय इति चेन्न, द्रव्यादिसप्तान्यतमत्वं द्रव्यादिभेद-सप्तकाभाववत्त्वमतो दोषविरहात्। एवमग्रेऽपि द्रष्टव्यम्।

द्रव्याणि कति, कानि च तानि?

**तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।**

**दीपिका** - द्रव्यं विभजते - तत्रेति। तत्र - द्रव्यादिमध्ये, द्रव्याणि नवैवेत्यन्वयः। कानि तानीत्यत आह - पृथिवीत्यादि। ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नवैव द्रव्याणि? तथाहि - नीलः तमश्चलतीत्यबाधितप्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च तमसो द्रव्यत्वं तावत्सिद्धम्, तत्र तमसो नाकाशादिपञ्चकेऽन्तर्भावो रूपवत्त्वात्; अत एव न वायौ स्पर्शाभावात्सदागतित्वाभावाच्च, नापि तेजसि भास्वररूपाभावादुष्णस्पर्शाभावाच्च, नापि जले शीतस्पर्शाभावान्नीलरूपाश्रयत्वाच्च, नापि पृथिव्यां गन्धवत्त्वाभावात् स्पर्शरहितत्वाच्च, तस्मात्तमो दशमद्रव्यमिति चेन्न, तमस्तेजोऽभावस्वरूपत्वात्; तथाहि - तमो न रूपवद्द्रव्यमालोका-सहकृतचक्षुर्ग्राह्यत्वात्, आलोकाभाववत्। रूपद्रव्यचाक्षुषप्रमायामालोकस्य कारणत्वात्, तस्मात् प्रौढप्रकाशतेजः सामान्याभावस्तमः, तत्र 'नीलं तमश्चलती'ति प्रत्ययो भ्रमः, अतो नव द्रव्याणीति सिद्धम्। द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्। लक्ष्यैकदेशावृत्तित्व-मव्याप्तिः, यथा - गोः कपिलत्वम्। अलक्ष्यवृत्तित्वमतिव्याप्तिः, यथा गोः शृङ्गित्वम्। लक्ष्यमात्रावर्तनमसम्भवः, यथा - गोरेकशफवत्त्वम्। एतद्दूषणत्रयरहितो धर्मो लक्षणम्। यथा गोः - सास्नादिमत्त्वम्। स एवासाधारणधर्म इत्युच्यते। लक्ष्यतावच्छेदकसमनियतत्वमसा-धारणत्वम्। व्यावर्तकस्यैव लक्षणत्वे व्यवहारस्यापि लक्षणप्रयोजनत्वे तु न देयम्। व्यावृत्तेरपि व्यवहारसाधनत्वात्। व्यावृत्तावभिधेयत्वादौ चातिव्याप्तिवारणाय तद्भिन्नत्वं धर्मविशेषण देयम्।

ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम्, आद्यक्षणावच्छिन्नघटे उत्पन्नविनष्टघटे चाव्याप्तेरिति चेन्न, गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्। नन्वेवमप्येकं रूपं

रसात्पृथगितिव्यवहाराद्रूपादावतिव्याप्तिरिति चेन्न, एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानङ्गीकारात्।

कति गुणाः, के च ते?

**रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽ-परत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माऽधर्म-संस्काराश्चतुर्विंशतिर्गुणाः।**

**दीपिका** - गुणं विभजते - रूपेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। गुणत्वजातिमान् वा। ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात्कथं चतुर्विंशतिर्गुणा इति चेन्न, लघुत्वस्य गुरुत्वाभावरूपत्वात्, मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात्।

कियन्ति कर्माणि, कानि च तानि?

**उत्क्षेपणा-ऽपक्षेपणाऽऽ-कुञ्चन-प्रसारण-गमनानि पञ्च कर्माणि।**

**दीपिका** - कर्म विभजते - उत्क्षेपणेति। संयोगभिन्नत्वे सति संयोगसमवायिकारणं कर्म, कर्मत्वजातिमद्वा। ननु भ्रमणादेरप्यतिरिक्तस्य कर्मणः सत्त्वात् पञ्चेत्यनुपपन्नमिति चेन्न, भ्रमणादीनामपि गमनेऽन्तर्भावान्न पञ्चविधत्वविरोधः।

सामान्यं कतिविधम्?

**परमपरं चेति द्विविधं सामान्यम्।**

**दीपिका** - सामान्यं विभजते - परमिति। परमधिकदेशवृत्तिः। अपरं न्यूनदेशवृत्तिः। सामान्यादिचतुष्टये जातिर्नास्ति।

कियन्तो विशेषाः?

**नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।**

**दीपिका** - विशेषं विभजते - नित्येति। पृथिव्यादिचतुष्टयस्य परमाणवः, आकाशादिपञ्चकं च नित्यद्रव्याणि।

समवायः कतिविधः?

**समवायस्त्वेक एव।**

**दीपिका** - समवायस्य भेदो नास्तीत्याह - समवायस्त्विति।

अभावः कतिविधः?

**अभावश्चतुर्विधः - प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति।**

**दीपिका** - अभावं विभजते - अभावेति। (इत्युद्देशग्रन्थः)

## (२) द्रव्यलक्षणप्रकरणम्।

पृथिव्याः किं लक्षणम्, कति च भेदाः?

**तत्र गन्धवती पृथ्वी। सा द्विविधा - नित्याऽनित्या च। नित्या - परमाणुरूपा। अनित्या - कार्यरूपा। पुनस्त्रिविधा - शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।**

**दीपिका** - तत्रोद्देशादिक्रमानुसारात् पृथिव्या लक्षणमाह - गन्धवतीति। नाम्ना पदार्थसङ्कीर्तनमुद्देशः। उद्देशक्रमे च सर्वत्रेच्छैव नियामिका। ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादादव्याप्तिः। न च तत्र गन्धप्रतीत्यनुपपत्तिरिति वाच्यम्। अवयवगन्धस्यैव तत्र प्रतीतिसम्भवेन चित्रागन्धानङ्गीकारात्। किं चोत्पन्नविनष्टघटा-दावव्याप्तिरिति चेन्न, गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्यैव विवक्षितत्वात्। ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न, अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र संयुक्तसमवायेन मानाङ्गीकारात्। ननु तथापि कालस्य सर्वधारतया सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेन्न सर्वाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धेन लक्षणस्याभिमतत्वात्।

पृथिवीं विभजते - सा द्विविधेति। नित्यत्वं ध्वंसाप्रतियोगित्वम्। अनित्यत्वं ध्वंसप्रतियोगित्वम्। प्रकारान्तरेण विभजते - पुनरिति। आत्मनो भोगायतनं शरीरम्। यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनम्। सुख-दुःखसाक्षात्कारो भोगः। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। शरीरेन्द्रियभिन्नो विषयः। एवं च गन्धवच्छरीरं पार्थिवशरीरम्। गन्धवदिन्द्रियं पार्थिवेन्द्रियम्। गन्धवान् विषयः पार्थिवविषयः। इति तल्लक्षणं बोध्यम्। पार्थिवशरीरं दर्शयति - शरीरमिति। पार्थिवेन्द्रियं दर्शयति - इन्द्रियमिति। गन्धग्राहकमिति प्रयोजनकथनम्। घ्राणमिति संज्ञा। नासाग्रवर्त्याश्रयोक्तिः। एवमुत्तरत्रापि ज्ञेयम्। पार्थिवविषयं दर्शयति - विषय इति।

जलस्य किं लक्षणम्, कति च भेदाः?

**शीतस्पर्शवत्य आपः। ता द्विविधा - नित्या अनित्याश्च। नित्याः परमाणुरूपाः, अनित्याः - कार्यरूपाः। पुनस्त्रिविधा - शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः - सरित्समुद्रादिः।**

**दीपिका** - अपां लक्षणमाह - शीतेति। उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्श-समानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यम्। शीतं शिलातलमित्यादौ जलसम्बन्धादेव शीतस्पर्शभानमिति नातिव्याप्तिः। अन्यत्सर्वं पूर्वरीत्या व्याख्येयम्।

तेजसः किं लक्षणं, कति च भेदाः?

**उष्णस्पर्शवत्तेजः। तच्च द्विविधम् - नित्यमनित्यं च। नित्यं - परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं - शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षु कृष्णताराग्रवर्ति। विषयश्चतुर्विधो - भौमदिव्योदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि।**

**दीपिका** - तेजसो लक्षणमाह - उष्णेति। उष्णं जलमिति प्रतीतेस्तेजःसम्बन्धानु-विधायित्वान्नतिव्याप्तिः। विषयं विभजते - भौमेति।

ननु सुवर्णं पार्थिवं पीतत्वाद् गुरुत्वाद्वा हरिद्रादिवदिति चेन्न, अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृते द्रवत्वनाशादर्शनेन, असति प्रतिबन्धके पार्थिवद्रव्य-वत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात्, सुवर्णस्यात्यन्तानलसंयोगे सत्यनुच्छिद्यमान-द्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः। तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबन्धकतया द्रवद्रव्यान्तरासिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः, रूपवत्तया वाय्वादिष्वनन्तर्भावात्तैजसत्वसिद्धिः। तत्रोष्णस्पर्शभास्वररूपयोरुपष्टम्भकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः। तस्मात्सुवर्णं तैजसमिति सिद्धम्।

वायोः किं लक्षणं, कति च भेदाः?

**रूपरहितस्पर्शवान् वायुः। स द्विविधः - नित्योऽनित्यश्च। नित्यः - परमाणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः - शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।**

**दीपिका** - वायुं लक्षयति - रूपेति। आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादावतिव्याप्तिवारणाय - रूपरहितेति।

ननु प्राणस्य कुत्रान्तर्भाव इत्यत आह - शरीरेति। स चेति। एक एव प्राणः स्थानभेदा-त्प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः। स्पर्शानुमेयो वायुः। तथाहि - योऽयं वायो वाति सत्यनुष्णशीतस्पर्श उपलभ्यते स क्वचिदाश्रितो, गुणत्वात् रूपवत्। न चास्य पृथिव्याश्रयः, उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्वनियमात्। न जलतेजसी, अनुष्णाशीतस्पर्शवत्त्वात्। न विभुचतुष्टयं, सर्वत्रोपलब्धिप्रसङ्गात्। न मनः, परमाणुस्पर्शस्यातीन्द्रियत्वात्। तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः।

ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वाद् घटवदिति चेन्न, उद्भूतरूपवत्त्वस्योपाधित्वात्। यत्र द्रव्यत्वे सति बहिरिन्द्रियजन्यप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति घटादौ साध्यव्यापकत्वम्। यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्रोद्भूतरूपवत्त्वं नास्तीतिपक्षे साधनाव्यापकत्वम्। न चैव तप्तवारिस्थतेजसोऽप्यप्रत्यक्षत्वापत्तिः, इष्टत्वात्। तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः।

(अथ सृष्टिप्रलयनिरूपणम्)

इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते - ईश्वरस्य चिकीर्षावशात्परमाणुषु क्रिया जायते। ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते। ततस्त्रिभिर्द्व्यणुकस्त्र्यणुकम्। एवं चतुरणुकादिक्रमेण महती पृथिवी, महत्य आपो महत्तेजो, महान् वायुरुत्पद्यते। एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् परमाणुषु क्रिया। क्रियया परमाणुद्वयविभागे सति द्व्यणुकनाशः। ततस्त्र्यणुकनाशः ततश्चतुरणुकस्य नाश इत्येवं पृथिव्यादिनाशः। असमवायिकारणनाशात् द्व्यणुकनाशः, समवायिकारणनाशात् त्र्यणुकनाश इति सम्प्रदायः। सर्वत्रासमवायिकारणनाशात् कार्यद्रव्यनाश इति नवीनाः।

किं पुनः परमाणुसद्भावे प्रमाणम्? उच्यते - जालसूर्यमरीचिस्थं सूक्ष्मतमं यद्रज उपलभ्यते तत्सावयवम्, चाक्षुषद्रव्यत्वात्, पटवत्। त्र्यणुकावयवोऽपि सावयवो महदारम्भकत्वात्, तन्तुवत्। यो द्व्यणुकावयवः स परमाणुः, स च नित्यः, तस्यापि कार्यत्वेऽनवस्थाप्रसङ्गात्। तथा च मेरुसर्षपयोरपि समानपरिमाणत्वापत्तिः। सृष्टिप्रलयसद्भावे किं मानम्? 'धाता यथापूर्वमकल्पयत्' इत्यादिश्रुतिरेव प्रमाणम्। सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः। सर्वभावकार्यध्वंसो महाप्रलय इति विवेकः। (इति सृष्टिप्रलयनिरूपणम्)।

आकाशस्य किं लक्षणं, कतिविधं च तत्?

**शब्दगुणकमाकाशम्। तच्चैकं विभुः नित्यं च।**

**दीपिका** - आकाशं लक्षयति - शब्देति। नन्वाकाशमपि किं पृथिव्यादिवन्नाना? नेत्याह - तच्चैकमिति। भेदे प्रमाणाभावादित्यर्थः। एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्व-मङ्गीकर्तव्यमित्याह - विभ्विति। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। मूर्तत्वं परिच्छन्नपरिमाणवत्त्वं वा। विभुत्वादेवात्मवन्नित्यमित्याह - नित्यं चेति।

कालस्य किं लक्षणं, कति च भेदाः?

**अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।**

**दीपिका** - कालं लक्षयति - अतीतेति। सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च।

दिशः किं लक्षणं, कतिविधा च सा?

**प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।**

**दीपिका** - दिशो लक्षणमाह - प्राचीति। दिगपि कार्यमात्रे निमित्तकारणम्।

आत्मनः किं लक्षणं, कतिविधश्च सः?

**ज्ञानाधिकरणमात्मा। स द्विविधः - जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।**

**दीपिका** - आत्मनो लक्षणमाह - ज्ञानेति। आत्मानं विभजते - स द्विविध इति। परमात्मनो लक्षणमाह - तत्रेति। नित्यज्ञानाधिकरणत्वमीश्वरत्वम्।

नन्वीश्वरस्य सद्भावे किं प्रमाणम्? न तावत्प्रत्यक्षम्। तद्धि बाह्यम्? आभ्यन्तरं वा? नाद्यम्, अरूपिद्रव्यत्वात्। नान्त्यम्, आत्मसुखादिव्यतिरिक्तत्वात्। नाप्यनुमानम्, लिङ्गाभावात्। नाप्यागमः, तथाविधागमाभावादिति चेन्न, क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात्, घटवदित्यनुमानस्य प्रमाणत्वात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्। उपादानं समवायिकारणम्। सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वम्। 'यः सर्वज्ञः स सर्ववित्' इत्याद्यागमोऽपि तत्र प्रमाणम्।

जीवस्य लक्षणमाह - जीवेति। सुखाद्याश्रयत्वं जीवलक्षणम्। ननु 'मनुष्योऽहं ब्राह्मणोऽहम्' इत्यादौ सर्वत्राहंप्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मेति चेन्न, शरीरस्यात्मत्वे करपादादिनाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात्। नापीन्द्रियाणामात्मत्वम्, तथात्वे 'योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामि' इत्यनुसन्धानाभावप्रसङ्गात्, अन्यानुभूतेऽन्यस्यानुसन्धानायोगात्। तस्माद् देहेन्द्रियव्यतिरिक्तो जीवः सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। स च न परमाणु-परिमाणः - (सर्व) शरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गात्। न मध्यमपरिमाणः, तथा सत्यनित्यत्वप्रसङ्गेन कृतनाशाकृताभ्यागमप्रसङ्गात्। तस्मान्नित्यो विभुर्जीवः।

मनसः किं लक्षणं, कतिविधं च तत्?

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।**

**दीपिका** - मनसो लक्षणमाह - सुखेति। स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम्। मनो विभजते - तच्चेति। एकैकस्यात्मने एकैकं मन आवश्यकम् इत्यात्मनो-ऽनेकत्वान्मनसोऽप्यनेकत्वमित्यर्थः। परमाणुरूपमिति। मध्यमपरिमाणत्वेऽनित्यत्वप्रसङ्गादित्यर्थः।

ननु मनो (नाणुः, किन्तु) विभुस्पर्शरहितद्रव्यत्वात् आकाशवदिति चेन्न, मनसो विभुत्वे आत्ममनःसंयोगस्याऽसमवायिकारणस्याऽभावाज्ज्ञानानुत्पत्तिप्रसङ्गात्। न च विभुद्वयसंयोगो-ऽस्त्विति वाच्यम्, तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसङ्गात्, पुरीतद्व्यतिरिक्तप्रदेशे आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्। अणुत्वे तु यदा मनः पुरीतति (नाड्या) प्रविशति तथा सुषुप्तिः, यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः।

## (३) गुणलक्षणप्रकरणम्।

**चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्। पृथिवी-जल-तेजोवृत्तिः। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।**

- रूपं लक्षयति - चक्षुरिति। सङ्ख्यादावतिव्याप्तिवारणाय मात्रपदम्। रूपत्वेऽतिव्याप्तिवारणाय गुणपदम्। (प्रभाभित्तिसंयोगेऽतिव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वं वाच्यम्) रूपं विभजते - तच्चेति। नन्वव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेन्न, रूपस्य व्याप्यवृत्तित्वनियमात्। ननु चित्रपटेऽवयवरूपस्य प्रतीतिरस्त्विति चेन्न, रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसङ्गात्। न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकः, गौरवात्। तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः। रूपस्याश्रयमाह - पृथिवीति। आश्रयं विभज्य दर्शयति - तत्रेति।

रसस्य किं लक्षणं कतिविधश्च सः?

**रसनाग्राह्यो गुणो रसः। स च मधुराऽम्ल-लवण-कटु-कषाय-तिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।**

**दीपिका** - रसं लक्षयति - रसनेति। रसत्वेऽतिव्याप्तिपरिहाराय गुणपदम्। रसस्याश्रयमाह - पृथिवीति। आश्रयं विभज्य दर्शयति - पृथिव्यामिति।

गन्धस्य किं लक्षणं, तद्भेदश्च कः?

**घ्राणग्राह्यो गुणो गन्धः। स द्विविधः - सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।**

**दीपिका** - गन्धं लक्षयति - घ्राणेति। गन्धत्वेऽतिव्याप्तिवारणाय गुणपदम्।

स्पर्शस्य किं लक्षणं, के च तस्य भेदाः?

**त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः शीतोष्णाऽनुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।**

**दीपिका** - स्पर्शं लक्षयति - त्वगिति। स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदम्। संयोगादावतिव्याप्तिवारणाय मात्रपदम्।

रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र?

**रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्राऽपाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।**

**दीपिका** - पाकजमिति। पाकजस्तेजः संयोगः। तेन पूर्वरूपं नश्यति - रूपान्तरमुत्पद्यत इत्यर्थः। अत्र परमाणुष्वेव पाकः, न द्व्यणुकादौ। आमपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे

पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणवः समवायिकारणम्, तेजःसंयोगः असमवायिकारणम्। अदृष्टादिकं निमित्तकारणम्। द्व्यणुकादिरूपे कारणरूपमसमवायि-कारणमिति पीलुपाकवादिनो वैशेषिकाः। पूर्वघटस्य नाशं विनैवावयवेषु परमाणुपर्यन्तेषु च युगपद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः। अतः एव पार्थिवपरमाणुरूपादिक-मनित्यमित्यर्थः।

अन्यत्रेति। जलादावित्यर्थः। नित्यगतमिति। परमाणुगतमित्यर्थः। अनित्यगतमिति। द्व्यणुकादिनिष्ठमित्यर्थः। रूपादिचतुष्टयमुद्भूतं प्रत्यक्षम्, अनुद्भूतमप्रत्यक्षम्। उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः। तदभावोऽनुद्भूतत्वम्।

सङ्ख्यायाः किं लक्षणम्, कुत्र च सा वर्त्तते?

**एकत्वादिव्यवहारहेतुः सङ्ख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव।**

**दीपिका** - सङ्ख्यां लक्षयति - एकत्वेति।

परिमाणस्य किं लक्षणं, के च तस्य भेदाः?

**मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्तिः। तच्चतुर्विधम् - अणु, महत्, दीर्घं, ह्रस्वं चेति।**

**दीपिका** - परिमाणं लक्षयति - मानेति। परिमाणं विभजते - तच्चेति। भावप्रधानो निर्देशः - अणुत्वं, महत्वं, दीर्घत्वं, ह्रस्वत्वं चेत्यर्थः।

पृथक्त्वस्य किं लक्षणम्?

**पृथग्व्यवहाराऽसाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्तिः।**

**दीपिका** - पृथक्त्वं लक्षयति - पृथगिति। इदमस्मात्पृथगिति व्यवहारकारणमित्यर्थः।

संयोगस्य किं लक्षणम्?

**संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः।**

**दीपिका** - संयोगं लक्षयति - संयुक्तेति। इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः। संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणायाऽसाधारणेति ज्ञेयम्। संयोगो द्विविधः - कर्मजः, संयोगजश्च। आद्यो हस्तक्रियया हस्तपुस्तकसंयोगः। द्वितीयो हस्तपुस्तक-संयोगात्कायपुस्तकसंयोगः। अव्याप्यवृत्तिः संयोगः। स्वात्यन्ताभावसमानाधिकरणत्व-मव्याप्यवृत्तित्वम्।

विभागस्य किं लक्षणम्?

**संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः।**

**दीपिका** - विभागं लक्षयति - संयोगेति। कालादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय संयोगनाशक इति। विभागोऽपि द्विविधः - कर्मजो विभागजश्च। आद्यो हस्तक्रियया हस्तपुस्तकविभागः। द्वितीयो हस्तपुस्तकविभागात्कायपुस्तकविभागः।

परत्वाऽपरत्वयोः किं लक्षणं, के च भेदाः?

**पराऽपरव्यवहाराऽसाधारणकारणे परत्वाऽपरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते च द्विविधे - दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।**

**दीपिका** - परत्वाऽपरत्वयोर्लक्षणमाह - परेति। परव्यवहारासाधारणकारणं परत्वम्। अपरव्यवहाराऽसाधारणकारणमपरत्वमित्यर्थः। परत्वाऽपरत्वं विभजते - ते द्विविधे इति। दिक्कृतयोरुदाहरणमाह - दूरस्थ इति। कालकृतं उदाहरति - ज्येष्ठ इति।

गुरुत्वस्य किं लक्षणम्?

**आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्तिः।**

**दीपिका** - गुरुत्वं लक्षयति - आद्येति। द्वितीयादिपतनस्य वेगसमवायिकारणत्वाद्वेगेऽति-व्याप्तिवारणायाद्येति।

द्रवत्वस्य किं लक्षणं, के च भेदाः?

**आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्तिः। तत् द्विविधम् - सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।**

**दीपिका** - द्रवत्वं लक्षयति - आद्यस्यन्दनेति। स्यन्दनं स्रवणम्। तेजः संयोगजन्यं नैमित्तिकद्रवत्वम्। तद्भिन्नं सांसिद्धिकद्रवत्वम्। पृथिव्या नैमित्तिकद्रवत्वमुदाहरति - घृतादाविति। तेजसि तदाह - सुवर्णादाविति।

स्नेहस्य किं लक्षणम्, कुत्र च सः?

**चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।**

**दीपिका** - स्नेहं लक्षयति - चूर्णेति। जलादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय चूर्णादीति।

शब्दस्य किं लक्षणम्, कतिविधश्च सः?

**श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। सः द्विविधः - ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।**

**दीपिका** - शब्दं लक्षयति - श्रोत्रेति। शब्दत्वेऽतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय श्रोत्रेति। शब्दस्त्रिविधः संयोगजो, विभागजः, शब्दजश्चेति। तत्राद्यो भेरीदण्डसंयोगजन्यः। द्वितीयो वंश उत्पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः। भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः शब्दजाः।

बुद्धेः किं लक्षणं, कतिविधा च सा?

**सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा स्मृतिरनुभवश्च।**

**दीपिका** - बुद्धेर्लक्षणमाह - सर्वेति। (कालादावतिव्याप्तिवारणाय गुणो बुद्धि इति। रूपादावतिव्याप्तिवारणाय सर्वव्यवहार इति)। जानामीत्यनुव्यवसायगम्यज्ञानत्वमेव लक्षणमित्यर्थः। बुद्धिं विभजते - सेति।

स्मृतेः किं लक्षणम्?

**संस्कारमात्रजन्यं ज्ञानं स्मृतिः।**

**दीपिका** - स्मृतेर्लक्षणमाह - संस्कारेति। भावनाख्यः संस्कारः। संस्कार-ध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति। घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति। प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेति।

अनुभवस्य किं लक्षणम्, कतिविधश्च सः?

**तद्भिन्नं ज्ञानमनुभवः। सः द्विविधः - यथार्थोऽयथार्थश्च।**

**दीपिका** - अनुभवं लक्षयति - तद्भिन्नमिति। स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः। अनुभवं विभजते - स द्विविध इति।

यथार्थानुभवस्य किं लक्षणम्?

**तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा - रजते 'इदं रजतमि'ति ज्ञानम्। सैव प्रमेत्युच्यते।**

**दीपिका** - यथार्थानुभवस्य लक्षणमाह - तद्वतीति। ननु घटे घटत्वमिति प्रमायामतिव्याप्तिः, घटत्वे घटाभावादिति चेन्न, यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभव इत्यर्थाद् घटत्वे घटसम्बन्धोऽस्तीति नाव्याप्तिः। सैवेति यथार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः।

अयथार्थानुभवस्य किं लक्षणम्?

**तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा - शुक्तौ 'इदं रजतमि'ति ज्ञानम्। सैवाऽप्रमेत्युच्यते।**

**दीपिका** - अयथार्थानुभवं लक्षयति - तदभाववतीति। नन्विदं संयोगीति प्रमाया-मतिव्याप्तिरिति चेन्न, यदवच्छेदेन यत्सम्बन्धाभावस्तदवच्छेदेन तत्संबन्धस्य विवक्षितत्वात्। संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् संयोगभावावच्छेदेन संयोगज्ञानस्य प्रमात्वा-न्नातिव्याप्तिः।

यथार्थानुभवभेदाः के?

**यथार्थानुभवश्चतुर्विधं - प्रत्यक्षाऽनुमित्युपमितिशाब्दभेदात्।**

**दीपिका** - यथार्थानुभवं विभजते - यथार्थेति।

तत्करणं कतिविधम्?

**तत्करणमपि चतुर्विधः - प्रत्यक्षाऽनुमानोपमानपशब्दभेदात्।**

**दीपिका** - प्रसङ्गात्प्रमाकरणं विभजते - तत्करणमिति। प्रमाकरणमित्यर्थः। प्रमायाः करणं प्रमाणमिति प्रमाणसामान्यलक्षणम्।

करणस्य किं लक्षणम्?

**असाधारणं कारणं करणम्।**

**दीपिका** - करणलक्षणमाह - असाधारणेति। साधारणकारणे दिक्कालादावतिव्याप्ति-वारणायाऽसाधारणेति।

कारणस्य किं लक्षणम्?

**कार्यनियतपूर्ववृत्तिकारणम्।**

**दीपिका** - कारणलक्षणमाह - कार्येति। पूर्ववृत्तिकारणमित्युक्तेः रासभादावतिव्याप्तिः स्यात्, अतो नियतेति। तावन्मात्रे कृते कार्येऽतिव्याप्तिः, अतः पूर्ववृत्तीति। ननु तन्तुरूपमपि पटं प्रति कारणं स्यादिति चेन्न अनन्यथासिद्धत्वे सतीति विशेषणात्। अनन्यथासिद्धत्व-मन्यथासिद्धिविरहः।

अन्यथासिद्धिश्च त्रिविधा - येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तेन तदन्यथासिद्धम्। यथा तन्तुना तन्तुत्वं च पटं प्रति। अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धम्। यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रत्याकाशस्य। अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धम्। यथा पाकजस्थले गन्धं प्रति रूपप्रागभावस्य। एवं चानन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्।

कार्यस्य किं लक्षणम्?

**कार्यं प्रागभावप्रतियोगि।**

**दीपिका** - कार्यलक्षणमाह - कार्यमिति।

कारणं कतिविधम्?

**कारणं त्रिविधं - समवाय्यसमवायिनिमित्तभेदात्।**

**दीपिका** - कारणं विभजते - कारणमिति।

समवायिकारणस्य किं लक्षणम्?

**यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। यथा - तन्तवः पटस्य, पटश्च स्वगतरूपादेः।**

- समवायिकारणस्य लक्षणमाह - यत्समवेतमिति। यस्मिन् समवेतमित्यर्थः।

असमवायिकारणस्य किं लक्षणम्?

**कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। यथा - तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य।**

**दीपिका** - असमवायिकारणं लक्षयति - कार्येणेति। कार्येणेत्येतदुदाहरति - तन्तुसंयोग इति। कार्येण पटेन सहैकस्मिंस्तन्तौ समवेतत्वात्तन्तुसंयोग पटस्यासमवायिकारणमित्यर्थः। कारणेनेत्येतदुदाहरति - तन्तुरूपमिति। कारणेन पटेन सहैकस्मिंस्तन्तौ समवेतत्वातन्तुरूपं पटरूपस्यासमवायिकारणमित्यर्थः।

निमित्तकारणस्य किं लक्षणम्?

**तदुभयभिन्नं कारणं निमित्तकारणम्। यथा - तुरीवेमादिकं पटस्य।**

**दीपिका** - निमित्तकारणं लक्षयति - तदुभयेति। समवाय्यसमवायिभिन्नं कारणं निमित्तकारणमित्यर्थः।

करणस्य निष्कृष्टलक्षणं किम्?

**तदेतत्त्रिविधकारणमध्ये यदसाधारणकारणं तदेव करणम्।**

**दीपिका** - करणलक्षणमुपसंहरति - तदेतदिति।

प्रत्यक्षप्रमाणलक्षणं किम्?

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्।**

**दीपिका** - प्रत्यक्षलक्षणमाह - तत्रेति। प्रमाणचतुष्टयमध्य इत्यर्थः।

प्रत्यक्षप्रमाणलक्षणं किम्, कतिविधं च तत्?

**इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्) तद्द्विविधम् - निर्विकल्पकं सविकल्पकं चेति।**

**दीपिका** - प्रत्यक्षज्ञानस्य लक्षणमाह - इन्द्रियेति। इन्द्रियं चक्षुरादिकम्, अर्थो घटादिः। तयोः सन्निकर्षः संयोगादिः। तज्जन्यं ज्ञानमित्यर्थः। तद्विभजते - तद्द्विविधमिति।

निर्विकल्पकस्य लक्षणं किम्?

**तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्, यथा - किञ्चिदिदमिति।**

**दीपिका** - निर्विकल्पकस्य लक्षणमाह - निष्प्रकारकमिति। विशेषणविशेष्यसंबन्धा-नवगाहिज्ञानमित्यर्थः। ननु निर्विकल्पके किं प्रमाणमिति चेन्न, गौरिति विशिष्टज्ञानं विशेषण-ज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात्। विशेषणज्ञानस्यापि सविकल्पकत्वेऽनवस्थाप्रसङ्गान्निर्विकल्पकसिद्धिः।

सविकल्पकस्य लक्षणं किम्?

**सप्रकारकं ज्ञानं सविकल्पकम्। यथा - डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति।**

**दीपिका** - सविकल्पकं लक्षयति - सप्रकारकमिति। नामजात्यादिविशेषणविशेष्य-सम्बन्धावगाहिज्ञानमित्यर्थः। सविकल्पकमुदाहरति - यथेति।

सन्निकर्षः कतिविधः कश्च सः?

**प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः - संयोगः - संयुक्तसमवायः, संयुक्त-समवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति।**

**दीपिका** - इन्द्रियार्थसन्निकर्षं विभजते - प्रत्यक्षेति।

घट (द्रव्य) प्रत्यक्षे कः सन्निकर्षः?

**चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।**

**दीपिका** - संयोगसन्निकर्षमुदाहरति - चक्षुषेति। द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्ष इत्यर्थः। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षज्ञानमुत्पद्यते।

घट (द्रव्य) रूपगुणप्रत्यक्षे कः सन्निकर्षः?

**घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः, चक्षुः संयुक्ते घटे रूपस्य समवायात्।**

**दीपिका** - संयुक्तसमवायमुदाहरति - घटरूपेति। तत्र युक्तिमाह - चक्षुः संयुक्त इति।

रूपत्व (गुणगतजाति) प्रत्यक्षे कः सन्निकर्षः?

**रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुः संयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्।**

**दीपिका** - संयुक्तसमवेतसमवायमुदाहरति - रूपत्वेति।

शब्दप्रत्यक्षे कः सन्निकर्षः?

**श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवर्त्त्याकाशस्य श्रोत्रत्वाच्छब्द-स्याकाशगुणत्वाद् गुणगुणिनोश्च समवायात्।**

**दीपिका** - समवायमुदाहरति - श्रोत्रेति। तदुपपादयति - कर्णेति। ननु दूरस्थशब्दस्य कथं श्रोत्रसम्बन्ध इति चेन्न, वीचीतरंगन्यायेन कदम्बमुकुलन्यायेन वा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य शब्दस्य श्रोत्रेण सम्बन्धात्प्रत्यक्षत्वसम्भवात्।

शब्दत्वसाक्षात्कारे कः सन्निकर्षः?

**शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।**

**दीपिका** - समवेतसमवायमुदाहरति - शब्दत्वेति।

अभावप्रत्यक्षे कः सन्निकर्षः?

**अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभाववद्भूतलमित्यत्र चक्षुसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।**

**दीपिका** - विशेषणविशेष्यभावमुदाहरति - अभावेति। अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। तदुपपादयति - घटाभाववदिति। भूतलं विशेष्यं, घटाभावो विशेषणम्। भूतले घटो नास्तीत्यत्र घटाभावस्य विशेष्यत्वं द्रष्टव्यम्। एतेनानुपलब्धेः प्रमाणान्तरत्वं निरस्तम्।

यद्यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत्। दर्शनाभावान्नास्तीति तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेन्द्रियेणैवाभावजानोपपत्तावनुपलब्धेः प्रमाणान्तरत्वासम्भवात्। अधिकरण-ज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तावनुपलब्धेः करणत्वस्यायुक्तत्वात्। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव, नातिरिक्तः सम्बन्धः।

प्रत्यक्षप्रमाणस्य निष्कृष्टं लक्षणं किम्?

**एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियम्, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।**

**दीपिका** - प्रत्यक्षज्ञानमुपसंहरंस्तस्य करणमाह - एवमिति। असाधारणकारणत्वादिन्द्रियं प्रत्यक्षज्ञानकरणमित्यर्थः। प्रत्यक्षप्रमाणमुपसंहरति - तस्मादिति।

**इति प्रत्यक्षपरिच्छेदः।**

## अथाऽनुमानखण्डम्।

अनुमानस्य किं लक्षणम्?

**अनुमितिकरणमनुमानम्।**

अनुमितिः का?

**परामर्शजन्यं ज्ञानमनुमितिः।**

परामर्शस्य किं स्वरूपम्?

**व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा - 'वह्निव्याप्यधूमवानयं पर्वत' इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः।**

व्याप्तिः का?

**यत्र यत्र धूमस्तत्र तत्राऽग्निरिति साहचर्यनियमो व्याप्तिः।**

पक्षधर्मतायाः किं लक्षणम्?

**व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।**

अनुमानं कतिविधम्?

अनुमानं द्विविधं - स्वार्थं परार्थं च।

कि नाम स्वार्थानुमानम्?

तत्र स्वार्थं स्वानुमितिहेतुः, तथाहि - स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति - 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्।

परार्थानुमानस्य किं लक्षणम्?

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम्। यथा - पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायम्, तस्मात्तथेति। अनेन प्रतिपादिताल्लिंगात् परोऽप्यग्निं प्रतिपद्यते।

पञ्चावयवाः के?

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमत्त्वादिति हेतुः। यो यो धूमवान् स स वह्निमानित्युदाहरणम्। तथा चायमित्युपनयः। तस्मात्तथेति निगमनम्।

स्वार्थानुमितिपरार्थानुमित्योः किं करणम्?

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।

लिङ्गं कतिविधं, किञ्चान्वयव्यतिरेकिलक्षणम्?

लिङ्गं त्रिविधम् - अन्वयव्यतिरेकि-केवलान्वयि-केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राऽग्निर्यथा - महानसमित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः।

केवलान्वयिनः किं लक्षणम्?

अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा - घटोऽभिधेयः प्रमेयत्वापटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

केवलव्यतिरेकिणः किं लक्षणम्?

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा - जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद् गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

पक्षस्य किं लक्षणम्?

**सन्दिग्धसाध्यवान् पक्षः। यथा -धूमवत्त्वे हेतौ पर्वतः।**

सपक्षस्य किं लक्षणम्?

**निश्चितसाध्यवान् सपक्षः। यथा तत्रैव महानसम्।**

विपक्षस्य किं लक्षणम्?

**निश्चितसाध्याऽभाववान् विपक्षः। यथा - तत्रैव महाह्रदः।**

हेत्वाभासाः कतिविधाः?

**सव्यभिचारविरुद्धसत्प्रतिपक्षाऽसिद्धबाधिताः पञ्च हेत्वाभासाः।**

सव्यभिचारस्य लक्षणं किं, कतिविधश्च सः?

**सव्यभिचारोऽनैकान्तिकः। स त्रिविधः - साधारणाऽसाधारणानुपसंहारिभेदात्।**

साधारणस्य किं लक्षणम्?

**तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा - पर्वतो वह्निमान् प्रमेयत्वादिति। (तत्र) प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्।**

असाधारणस्य किं लक्षणम्?

**सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा - शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्तिः।**

अनुपसंहारिणः किं लक्षणम्?

**अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा - सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति।**

विरुद्धस्य किं लक्षणम्?

**साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा - शब्दो नित्यः कृतकत्वादिति। (अत्र) कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।**

सत्प्रतिपक्षस्य किं लक्षणम्?

**यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा - शब्दो नित्यः श्रवणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद्घटवत्।**

असिद्धः कतिविधः?

**असिद्धस्त्रिविधः - आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।**

आश्रयासिद्धः कः?

आश्रयासिद्धो यथा - गगनारविन्दं सुरभिः अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव।

स्वरूपासिद्धस्य किं रूपम्?

स्वरूपासिद्धो यथा - शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्।

व्याप्यत्वासिद्धः कः, किञ्चोपाधिस्वरूपम्?

सोपाधिको हेतुर्व्याप्यत्वाऽसिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्। साध्यसमानाधिकरणाऽत्यन्ताऽभावाऽप्रतियोगित्वम् - साध्यव्यापकत्वम्। साधनवन्निष्ठाऽत्यन्ताऽभावाऽप्रतियोगित्वम् साधनाऽव्यापकत्वम्। यथा - पर्वतो धूमवान् वह्निमत्त्वादित्यत्राऽऽर्द्रेन्धनसंयोग उपाधिः। तथाहि - यत्र धूमस्तत्राऽऽर्द्रेन्धनसंयोगेति साध्यव्यापकत्वम्। यत्र वह्निस्तत्राऽऽर्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाऽभावादिति साधनाऽव्यापकत्वम्। एवं साध्यव्यापकत्वं सति साधनाऽव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वाऽसिद्धम्।

बाधितस्य किं लक्षणम्?

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्राऽनुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम्।

**अथोपमानखण्डम्।**

उपमानलक्षणं किम्?

उपमितिकरणं उपमानम्। संज्ञा-संज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम् (अतिदेशवाक्यार्थस्मरणम् - अवान्तरव्यापारः)। तथाहि कश्चिद् गवयशब्दवाच्य-(पदार्थ)-मजानन् कुतश्चिदारण्यकपुरुषात्-गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरमसौ ‘अयं गवयशब्दवाच्य, इत्युपमितिरुत्पद्यते।

**अथ शब्दखण्डम्।**

शब्दप्रमाणस्य किं स्वरूपम्?

आप्तवाक्यं शब्दः; आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः।

वाक्यार्थज्ञाने के हेतवः?

**आकाङ्क्षायोग्यतासन्निधिश्च वाक्यार्थज्ञाने हेतुः।**

पदस्य पदान्तरव्यतिरेकप्रयुक्ताऽननुभावकत्वमाकाङ्क्षा। अर्थाऽबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा - 'गौरश्वः पुरुषो हस्ती'ति न प्रमाणम् - आकांक्षाविरहात्। 'वह्निना सिञ्चती'ति न प्रमाणम् योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि 'गामानये'त्यादिपदानि न प्रमाणम् - सान्निध्याऽभावात्।

वाक्यं कतिविधम्?

**वाक्यं द्विविधम् - वैदिकं-लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्।**

शाब्दज्ञानं किम्?

**वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं तु शब्दः।**

## अथाऽवशिष्टगुणनिरूपणम्।

अयथार्थानुभवस्य कति भेदाः?

**अयथार्थानुभवस्त्रिविधः - संशय-विपर्यय-तर्कभेदात्।**

संशयस्य किं लक्षणम्?

**एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा - स्थाणुर्वा पुरुषो वेति।**

विपर्ययः कः?

**मिथ्याज्ञानं विपर्ययः। यथा - शुक्तौ 'रजतम्' इति।**

तर्कस्य किं स्वरूपम्?

**व्याप्याऽऽरोपेण व्यापकाऽऽरोपस्तर्कः। यथा - यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति।**

स्मृतिः कतिविधाः?

**स्मृतिरपि द्विविधा - यथार्था अयथार्था चेति। प्रमाजन्या यथार्था; अप्रमाजन्या अयथार्था।**

सुखस्य किं लक्षणम्?

**सर्वेषामनुकूल -(तया) वेदनीयं सुखम्।**

दुःखस्य किं लक्षणम्?

**प्रतिकूल(तया) वेदनीयं दुःखम्।**

इच्छाद्वेषप्रयत्नानां कानि लक्षणानि?

**इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः।**

धर्मस्य अधर्मस्य च किं लक्षणम्?

**विहितकर्मजन्यो धर्मः, निषिद्धकर्मजन्यस्त्वधर्मः।**

आत्ममात्रविशेषगुणाः के?

**बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या - ईश्वरस्य, अनित्या- जीवस्य।**

संस्कारः कतिविधः, तद्भेदाश्च किंस्वरूपाः?

**संस्कारस्त्रिविधः - वेगो, भावना, स्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनो (मात्र)वृत्तिः। अनुभवजन्या, स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः अन्यथाकृतस्य पुनस्तदव-स्थाऽऽपादकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः।**

## अथ कर्मलक्षणप्रकरणम्।

कर्मणः किं लक्षणम्?

**चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।**

## (अथ प्रामाण्यविचारः)

## अथ सामान्यलक्षणप्रकरणम्।

सामान्यस्य किं लक्षणम्?

**नित्यमेकमनेकाऽनुगतं सामान्यम्। द्रव्यगुणकर्मवृत्तिः। तद् द्विविधं पराऽपरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि।**

## अथ विशेषलक्षणप्रकरणम।

विशेषाणां किं लक्षणम्?

**नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।**

## अथ समवायलक्षणप्रकरणम्।

समवायस्य किं लक्षणम्?

**नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराऽऽश्रित-मेवाऽवतिष्ठते तावयुतसिद्धौ। यथा अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जाति-व्यक्ति, विशेष-नित्यद्रव्ये चेति।**

**अथाऽभावलक्षणप्रकरणम्।**

प्रागभावस्य किं लक्षणम्?

**अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य।**

प्रध्वंसाभावस्य किं लक्षणम्?

**सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य।**

अत्यन्ताभावस्य किं लक्षणम्?

**त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा - 'भूतले घटो नास्ती'ति।**

अन्योन्याभावस्य किं लक्षणम्?

**तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा - 'घटः पटो ने'ति।**

अथ पदार्थानुपसंहरति।

**सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम्।**

**इति श्रीमदन्नम्भट्टविरचितस्तर्कसंग्रहः समाप्तः।**

**१. मङ्गलप्रयोजनं मङ्गलस्य कर्तव्यत्वे प्रमाणं च।**

अन्नम्भट्टः तर्कसंग्रहाख्यस्य स्वकीयग्रन्थस्यारम्भे -

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः।।

इति मङ्गलं कृतवान्।

तत्र प्रथमं मङ्गलस्य किं प्रयोजनमिति विचार्यते दीपिकायाम्। तत्रोक्तम् - चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिः मङ्गलस्य प्रयोजनम् इति। तच्चात्र इष्टदेवतानमस्कारपूर्वकं कृतम्। अत्रायं संशयः - मनसि कृतेन मङ्गलेनापि निर्विघ्नपरिसमाप्तिः स्यात्। तथा सति ग्रन्थारम्भे तन्निबन्धनस्य किं प्रयोजनमिति। तत्र समाधानमुक्तम् - शिष्यशिक्षार्थं निबध्नन् इति। ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलं कर्तव्यमिति शिष्याणां बोधो यथा स्यादित्येवमर्थम् इत्यर्थः। यद्याचार्यो मङ्गलं न करोति तर्हि तमनुकुर्वन् शिष्योऽपि न कुर्यादिति भावः। तथा च ग्रन्थस्य निर्विघ्नपरिसमाप्तिः मङ्गलस्य प्रयोजनमिति दीपिकाकारः।

अत्रायं पूर्वपक्षः निर्विघ्नपरिसमाप्तिं प्रति मङ्गलं कारणमिति वक्तुं न शक्यते अन्वयव्यभिचारदर्शनात् व्यतिरेकव्यभिचारदर्शनाच्च। कारणसत्वेऽपि कार्यानुत्पत्तिः अन्वय-व्यभिचारः। तदत्रास्ति। तथा हि कादम्बर्यादौ मङ्गले कृतेऽपि परिसमाप्तिः न दृश्यते। कारणाभावेऽपि कार्योत्पत्तिः व्यतिरेकव्यभिचारः। सोऽप्यत्र

वर्तते। बौद्धाः तावत् नास्तिकाः। तत्कृतेषु किरणावल्यादिषु ग्रन्थेषु मङ्गलं न दृश्यते। तथापि ग्रन्थस्य निर्विघ्नपरिसमाप्तिः दृश्यते। एवमुभयत्रापि व्यभिचारसत्वात् समाप्तिं प्रति मङ्गलस्य कारणत्वं नास्तीति।

अत्रेदमुच्यते - कादम्बर्यादौ विघ्नबाहुल्यात् समाप्त्यभावः। विघ्नसंसंख्याकं मङ्गलमत्र नास्तीति यावत्। अतः नान्वयव्यभिचारः। कारणेन कार्यानुमानवत् कार्येण कारणमपि अनुमीयते। तथा च किरणावल्यादौ ग्रन्थमुखे मङ्गलादर्शनेऽपि ग्रन्थाद्बहिरेव मङ्गलं कृतमित्यनुमीयते। अतः व्यतिरेकव्यभिचाराभावात् मङ्गलस्य समाप्तिसाधनत्वमस्त्येव।

अत्र पुनरप्ययं संशयः - मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति। तत्रेदमुत्तरम् - शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वमिति। 'समाप्तिकामो मङ्गलमाचरेत्' इति श्रुतिः। सा च शिष्टाचारेणानुमीयते। अनुमानञ्चेत्थम् - मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकाविगीत-शिष्टाचारविषयत्वात्, यथा - दर्शादिवत् इति। तत्र मङ्गलं पक्षः, वेदबोधितकर्तव्यताकत्वं साध्यम्, अलौकिकाविगीतशिष्टाचारविषयत्वं हेतुः, दर्शादियागः दृष्टान्तः।

अविगीतशिष्टाचारविषयत्वस्य भोजनादौ सत्वात् तत्र व्यभिचारवारणाय अलौकिकेति पदम्। रात्रिश्राद्धादीनामलौकिकाचारत्वात् तत्र व्यभिचारवारणाय अविगीतेति। अविगीतत्वं बलवदनिष्टाननुबन्धित्वम्। एवमनुमितश्रुतिः मङ्गलस्य कर्तव्यत्वे प्रमाणमिति सिद्धम्। एवमत्रावधेयम् -

१. मङ्गलस्य प्रयोजनम् - ग्रन्थस्य निर्विघ्नपरिसमाप्तिः।

२. प्रमाण् - शिष्टाचारानुमितश्रुतिः।

३. ग्रन्थस्यारम्भे करणम् - शिष्यशिक्षार्थम् इति।

-.-.-.-

## २. तमसः दशमद्रव्यत्वं निरस्यत।

अन्नम्भट्टविरचिते तर्कसंग्रहे तावत् - 'तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकाल-दिगात्ममनांसि नवैव' इति द्रव्याणि नवैवेत्युक्तम्।

तत्र दीपिकायां नवैव द्रव्याणि इति समर्थनाय अयं पूर्वपक्षः प्रदर्शितः - 'ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नवैव द्रव्याणि इति। पूर्वपक्षश्चैव समर्थनीयः - द्रव्यत्वजातिमत्त्वं क्रियावत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्। 'नीलः तमश्चलति' इत्यबाधितप्रतीतिबलान्नील-रूपाधारतया क्रियाधारतया च तमसो द्रव्यत्वं तावत्सिद्धम्। उक्तेषु नवसु अपि द्रव्येषु न तस्यान्तर्भावः। तथाहि - आकाशादीनां रूपाभावात्, तमसः रूपवत्त्वात् च तस्य नाकाशादिपञ्चके अन्तर्भावः। रूपवत्त्वात् स्पर्शाभावात्सदागतित्वाभावाच्च न वायौ अन्तर्भावः। भास्वररूपा-भावादुष्णस्पर्शाभावाच्च न तेजसि अन्तर्भावः।

शीतस्पर्शाभावान्नीलरूपाश्रयत्वाच्च नापि जले अन्तर्भावः। गन्धवत्त्वाभावात् स्पर्शरहितत्वाच्च नापि पृथिव्याम्। तस्मात् प्रसिद्धेषु नवसु नान्तर्भावात् द्रव्यसामान्यलक्षणत्वाच्च तमसः अतिरिक्तद्रव्यत्वसिद्धिरिति पूर्वपक्षः।

तत्रेदमुत्तरम् - तेजोऽभावस्वरूपत्वात् तमः न द्रव्यम्। रूपद्रव्यचाक्षुषप्रत्यक्षे आलोकः सहकारि कारणं भवति। आलोकसहकृतचक्षुर्ग्राह्यत्वमस्ति रूपद्रव्याणाम्। आलोकासहकृत-चक्षुर्ग्राह्यत्वमेव तमसः। अतः तमो न दशमद्रव्यम्। 'नीलः तमः चलती'ति प्रतीतिः आलोकापसरणादिनां जन्या। सा च भ्रमैव। अतः प्रौढप्रकाशतेजसः सामान्याभावः एव तमः।

-.-.-.

## ३. पदार्थाः।

'द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया-ऽभावाः सप्तपदार्थाः' इति।

द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावः इति पदार्थाः सप्तविधं भवति।

## ४. द्रव्याणि।

'तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव' इति।

पृथिवी, अप्, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनः इति नवद्रव्याणि सन्ति।

## ५. गुणाः।

रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽ-परत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माऽधर्म-संस्काराश्चतुर्विंशतिगुणाः।

रूपम्, रसः, गन्धः, स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्नेहः, शब्दः, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः इति चतुर्विंशतिगुणाः सन्ति।

## ६. कर्माणि।

उत्क्षेपण-ऽपक्षेपणाऽऽ-कुञ्चन-प्रसारण-गमनानि पञ्चकर्माणि। इति।

उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् इति कर्माणि पञ्च।

चलनात्मकं कर्म इति कर्मलक्षणम्।

ऊर्ध्वदेशसंयोगहेतुः उत्क्षेपणम्।

अधोदेशसंयोगहेतुः अपक्षेपणम्।

शरीरस्य सन्निकृष्टसंयोगहेतुः आकुञ्चनम्।

शरीरस्य विप्रकृष्टसंयोगहेतुः प्रसारणम्।

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणभिन्नं सर्वं गमनम्।

**७. सामान्यम्।**

नित्यमेकमनेकानुगतं सामान्यम् इति सामान्यलक्षणम्। द्रव्यगुणकर्मवृत्तिः। सामान्यं द्विविधम् - परमपरं चेति। परं सत्ता, अपरं द्रव्यत्वादि।

**८. विशेषाः।**

नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः इति विशेषलक्षणम्। विशेषास्तु अनन्ताः एव।

**९. समवायः।**

नित्यसम्बन्धः समवायः इति समवायलक्षणम्। समवायस्तु एक एव। अयुतसिद्धवृत्तिः। ययोद्वयोर्मध्ये एकमविनश्यदपराश्रितमेव अवतिष्ठते तावयुतसिद्धौ। यथा - अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जाति-व्यक्ती, विशेष-नित्यद्रव्ये चेति।

**१०. अभावः।**

अभावः चतुर्विधः। प्रागभावः प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः चेति।

अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य।

सादिरनन्तः प्रध्वंसाभावः। उत्पत्त्यनन्तरं कार्यस्य।

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः

यथा - 'भूतले घटो नास्ति' इति।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः।

यथा - 'घटः पटो न' इति।

**११. पृथिवी।**

नवद्रव्येषु अन्यतमा भवति पृथिवी। गन्धवती पृथ्वी इति पृथिव्याः लक्षणम्। सा द्विविधा - नित्या, अनित्या च। नित्या परमाणुरूपा, अनित्या कार्यरूपा। ध्वंसाप्रतियोगित्वं नित्यत्वम्, ध्वंसप्रतियोगित्वं अनित्यत्वम्। अनित्या पृथिवी पुनस्त्रिविधा - शरीरेन्द्रियविषयभेदात्। शरीरम् अस्मदादीनाम्। आत्मना भोगायतनं शरीरम्। सुखदुःखसाक्षात्कारो भोगः। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियत्वम्। शरीरेन्द्रियभिन्नो विषयः। सः मृत्पाषाणादिः। एवं गन्धवच्छरीरं पार्थिवशरीरम्, गन्धवदिन्द्रियं पार्थिवेन्द्रियम्, गन्धवान् विषयः पार्थिवविषयः।

**१२. आपः।**

नवद्रव्येषु अन्यतमा भवति अप्। शीतस्पर्शवत्यः आपः इति जलस्य लक्षणम्। आपः द्विविधाः - नित्याः, अनित्याश्च। नित्याः परमाणुरूपाः, अनित्याः कार्यरूपाः। ध्वंसाप्रतियोगित्वं नित्यत्वम्। ध्वंसप्रतियोगित्वम्

अनित्यत्वम्। अनित्याः आपः पुनस्त्रिविधाः - शरीरेन्द्रिय-विषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।

### १३. तेजः।

नवद्रव्येषु अन्यतमं भवति तेजः। 'उष्णस्पर्शवत्तेजः' इति तेजसः लक्षणम्। तत् द्विविधम् - नित्यम्, अनित्यं च। नित्यं परमाणुरूपम्, अनित्यं कार्यरूपम्। अनित्यं तेजः पुनस्त्रिविधम् - शरीरेन्द्रियविषयभेदात्। शरीरम् आदित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयः चतुर्विधः - भौमदिव्योदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुः उदर्यम्। आकरजं सुवर्णादि।

### १४. वायुः।

नवद्रव्येषु अन्यतमो भवति वायुः। रूपरहितस्पर्शवान् वायुः इति वाय्वोः लक्षणम्। सः द्विविधः - नित्यः अनित्यश्च। नित्यः परमाणुरूपः, अनित्यः कार्यरूपः। कार्यरूपः पुनस्त्रिविधः - शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तः सञ्चारी वायुः प्राणः। सः एकः, उपाधिभेदात् प्राणापानोदानव्यानसमानसंज्ञा लभते।

स्पर्शानुमेयो वायुः। तत्तु एवं समर्थयति - योऽयं वायुः वाति सत्यनुष्णाशीतस्पर्शः उपलभ्यते स क्वचिदाश्रितो गुणत्वात् रूपवत्। उद्भूतस्पर्शवत्पार्थिवस्योद्भूतस्वरूपत्त्वनियमात् सः न पृथिव्याश्रयः। अनुष्णाशीतस्पर्शवत्त्वात् वायुः जलतेजसि न अन्तर्भवति। वायुः सर्वत्र उपलब्धिप्रसङ्गात् सः न विभुचतुष्टयम्। परमाणुस्पर्शस्य अतीन्द्रियत्वात् सः न मनः। तस्मात् प्रतीयमानस्पर्शाश्रयः वायुः।

### १५. संयोगविभागौ।

संयुक्तव्यवहारहेतुः संयोगः। इमौ संयुक्तौ इति व्यवहारहेतुः इत्यर्थः। सः सर्वद्रव्यवृत्तिः। रूपादिचतुष्टयं विना संख्यादिलक्षणेषु सर्वत्र दिक्कालादौ अतिव्याप्तिवारणाय असाधारणेति देयम्। संयोगो द्विविधः - कर्मजः संयोगजः च। हस्तक्रियया हस्तपुस्तकसंयोगः कर्मजः। हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः संयोगजः। संयोगः अव्याप्यवृत्तिः। स्वात्यान्ताभाव-समानाधिकरणम् अव्याप्यवृत्तित्वम्।

संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः। कालादौ अतिव्याप्तिवारणाय गुण इति, रूपादौ अतिव्याप्तिवारणाय संयोगनाशकः इति च लक्षणे दृष्टम्। विभागः द्विविधः - कर्मजः विभागजश्च। हस्तक्रियया हस्तपुस्तकविभागः कर्मजः, हस्तपुस्तकविभागात्कायपुस्तकविभागः विभागजः च।

### १६. शब्दः।

चतुर्विंशतिगुणेषु अन्यतमो भवति शब्दः। श्रोत्रग्राह्यो गुणः शब्दः इति शब्दलक्षणम्। शब्दत्वे अतिव्याप्तिवारणाय गुण इति, रूपादौ अतिव्याप्तिवारणाय श्रोत्र इति च लक्षणे दृष्टम्। आकाशमात्रवृत्तिः। शब्दः द्विविधः - ध्वन्यात्मकः,

वर्णात्मकः च। भेर्यादौ ध्वन्यात्मकः, संस्कृतभाषादिरूपः वर्णात्मकः। शब्दः पुनस्त्रिविधः - संयोगजः, विभागजः, शब्दजः चेति। भेरीदण्डसंयोगाजन्यः संयोगजः। वंश उत्पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः विभागजः। भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः शब्दजाः।

### १७. बुद्धिः।

चतुर्विंशतिगुणेषु अन्यतमा भवति बुद्धिः। सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् इति बुद्धेः लक्षणम्। कालादौ अतिव्याप्तिवारणाय गुण इति रूपादौ अतिव्याप्तिवारणाय सर्वव्यवहारः इति च लक्षणे दृष्टम्। जानामि इत्यनुव्यवसायगम्यज्ञानत्वमेव लक्षणमित्यर्थः।

सा बुद्धिः द्विविधा - स्मृतिः अनुभवः च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः इति स्मृतेः लक्षणम्। भावनाख्यः संस्कारः। संस्कारध्वंसे अतिव्याप्तिवारणाय ज्ञानम् इति, घटादिप्रत्यक्षे अतिव्याप्तिवारणाय संस्कारजन्यम् इति, प्रत्यभिज्ञायाम् अतिव्याप्तिवारणाय मात्र इति च लक्षणे दृष्टम्।

स्मृतिभिन्नं ज्ञानमनुभवः इति अनुभवस्य लक्षणम्। सः द्विविधः - यथार्थः अयथार्थश्च। तद्वति तत्प्रकारकोऽनुभवो यथार्थः। अयं शास्त्रे प्रमा इत्युच्यते। यथा - रजते 'इदं रजतम्' इति ज्ञानम्। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। स एव शास्त्रे अप्रमा इत्युच्यते। यथा - शुक्तौ 'इदं रजतम्' इति ज्ञानम्।

यथार्थानुभवः चतुर्विधः प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दं चेति। यथार्थानुभवभेदस्य करणमपि चतुर्विधः -प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दं चेति। प्रमायाः करणं प्रमाणमिति प्रमाणसामान्यलक्षणम्।

### १८. प्रत्यक्षप्रमाणम्।

प्रमाणचतुष्टयमध्ये प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इति प्रत्यक्षप्रमाणलक्षणम्। इन्द्रियं चक्षुरादिकम् अर्थो घटादिः। तयो सन्निकर्षात् संयोगात् जन्यं ज्ञानमित्यर्थः। तद्द्विविधम् -निर्विकल्पकं, सविकल्पकं चेति। निष्प्रकारकं ज्ञानं निर्विकल्पकम् इति निर्विकल्पकलक्षणम्। विशेषणविशेष्यसम्बन्धानवगाहि ज्ञानमित्यर्थः। यथा - किञ्चिदिदम् इति। सप्रकारकं ज्ञानं सविकल्पकम्। नामजात्यादिविशेषण- विशेष्यसम्बन्धावगाहि ज्ञानमित्यर्थः। यथा - डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति।

### १९. सन्निकर्षः।

प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः षड्विधः - संयोगः, संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावः चेति।

चक्षुषा द्रव्यप्रत्यक्षजनने संयोगः सन्निकर्षः। द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्षः इत्यर्थः। आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षज्ञानमुत्पद्यते। द्रव्यरूपगुणप्रत्यक्षजनने

संयुक्तसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्य आकाशगुणत्वात् गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलम् इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्, तत्करणमिन्द्रियम्, तस्मात् इन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

## २०. कारणम्।

तर्कसंग्रहे यथार्थानुभवस्य भेदान् तत्करणान् च उक्त्वा करणम् किमित्युच्यते -

असाधारणं कारणं करणम् इति।

कार्यनियतपूर्ववृत्ति कारणम्। कारणं त्रिविधम् - समवाय्यसमवायिनिमित्तभेदात्।

यत्समवेतं कार्यमुपद्यते तत् समवायिकारणम्।

यथा - तन्तवः पटस्य, पटश्च स्वगतरूपादेः।

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम्।

यथा - तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य।

कार्येण पटेन सहैकस्मिंस्तन्तौ समवेतत्वात् तन्तुसंयोगं पटस्य असमवायिकारणम्। कारणेन पटेन सहैकस्मिंस्तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्य असमवायिकारणम्।

समवाय्यसमवायिभिन्नं कारणं निमित्तकारणम्।

यथा - तुरीवेमादिकं पटस्य।

एवं एतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

## २१. अन्यथासिद्धिः।

अन्यथासिद्धिः त्रिविधा -

१. येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तेन तत् अन्यथासिद्धम्।
   यथा - तन्तुना तन्तुरूपं तन्तुत्वं च पटं प्रति।
२. अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तत् अन्यथासिद्धम्।
   यथा - शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रत्याकाशस्य।
३. अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धम्।
   यथा - पाकजस्थले गन्धं प्रति रूपप्रागभावस्य।

अन्यथासिद्धिविरहः अनन्यथासिद्धत्वम्। एवं च अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्।

## २२. अनुमानप्रमाणम्।

यथार्थानुभवभेदः भवति अनुमितिः। परामर्शजन्यं ज्ञानम् अनुमितिः। व्याप्तिविशिष्ट-पक्षधर्मताज्ञानं परामर्शः।

यथा - 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः। अनुमितिः नाम प्रमायाः करणम् अनुमानम्। तद्द्विविधम् - स्वार्थानुमानं, परार्थानुमानं चेति।

स्वार्थानुमानम् - स्वानुमितिहेतुः स्वार्थम्। तथाहि स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्र अग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वतो धूमं पश्यन् व्याप्तिं स्मरति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते। अयं लिङ्गपरामर्शः इत्युच्यते। तस्मात् पर्वतो वह्निमान् इति ज्ञानम् - अनुमितिः उत्पद्यते। तत् स्वार्थानुमानम् ।

परार्थानुमानम् - यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। यथा - पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान् स स वह्निमानित्युदाहरणम्। यथा - महानसम्। तथा चायमित्युपनयः। तस्मात् तथेति निगमनम्। अनेन प्रतिपादितात् लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।

## २३. लिङ्गम्।

लिङ्गपरामर्शः अनुमानम्। लिङ्गं त्रिविधम् -

१. अन्वयव्यतिरेकि - अन्वयेन व्यतिरेकेण च व्याप्तिमत् अन्वयव्यतिरेकि।

यथा - वह्नौ साध्ये धूमवत्त्वम्।

यत्र धूमस्तत्र अग्निः यथा महानसम् इत्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रदः इति व्यतिरेकव्याप्तिः।

२. केवलान्वयि - अन्वयमात्रव्याप्तिकं केवलान्वयि।

यथा - घटोऽभिधेयः प्रमेयत्वात्पटवत्।

अत्र प्रमेयत्वाभिधेययत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

३. केवलव्यतिरेकि - व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि।

यथा - पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत्। यथा - जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद् गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

## २४. हेत्वाभासाः।

हेत्वाभासाः पञ्च । सव्यभिचारविरुद्धसत्प्रतिपक्षाऽसिद्धबाधिताः।

१. सव्यभिचारः - सव्यभिचारोऽनैकान्तिकः। सः त्रिविधः -

साधारणः, असाधारणः, अनुपसंहारि चेति।

साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा - पर्वतो वह्निमान् प्रमेयत्वात् इति।

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः असाधारणः।

यथा - शब्दो नित्यः शब्दत्वात् इति।

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारि। यथा - सर्वमनित्यं प्रमेयत्वात् इति।

२. विरुद्धः -साध्याभावव्याप्तो हेतुः विरुद्धः। यथा - शब्दो नित्यः कृतकत्वादिति। अत्र कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।

३. सत्प्रतिपक्षम् - यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः सत्प्रतिपक्षः। यथा - शब्दो नित्यः श्रावणत्वात्। शब्दत्ववत्। शब्दोऽनित्यः कार्यत्वात् घटवत्।

४. असिद्धः - असिद्धः त्रिविधः

४.१. आश्रयासिद्धः - यथा गगनारविन्दं सुरभि अरविन्दत्वात्, सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव।

४.२. स्वरूपासिद्धः - यथा - शब्दो गुणः चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्।

४.३. व्याप्यत्वासिद्धः - सोपाधिको हेतुः व्याप्यत्वाऽसिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्। साध्यसमानाधिकरणाऽत्यन्ताऽभावाऽप्रतियोगित्वम् - साध्यव्यापकत्वम्। यथा - पर्वतो धूमवान् वह्निमत्वात् इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः।

५. बाधितः - यस्य साध्याभावः प्रमाणान्तरेण निश्चितः सः बाधितः। यथा - वह्निरनुष्णो द्रव्यत्वादिति। अत्र अनुष्णत्वं साध्यं, तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वात्।

## २५. उपमानप्रमाणम्।

यथार्थानुभवभेदः उपमितिः। संज्ञा - संज्ञिसम्बन्धज्ञानमुपमितिः। उपमितिकरणम् उपमानम्, सादृश्यज्ञानम् इत्यर्थः। तथाहि - कश्चिद् गवयशब्दवाच्य-(पदार्थ)-मजानन् कुतश्चिदारण्यकपुरुषात्- गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरमसौ ‘अयं गवयशब्दवाच्य, इत्युपमितिरुत्पद्यते।

**२६. शब्दप्रमाणम्।**

यथार्थानुभवभेदः शाब्दः। तत्करणं शब्दः। आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा - गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः।

**२७. सुवर्णस्य तैजसत्वम्।**

ननु सुवर्णं पार्थिवं पीतत्वाद् गुरुत्वाद्वा हरिद्रादिवदिति चेन्न, अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृते द्रवत्वनाशादर्शनेन, असति प्रतिबन्धके पार्थिवद्रव्य-वत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात्, सुवर्णस्यात्यन्तानलसंयोगे सत्यनुच्छिद्यमान-द्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः। तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबन्धकतया द्रवद्रव्यान्तरासिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः, रूपवत्तया वाय्वादिष्वनन्तर्भावात्तैजसत्वसिद्धिः। तत्रोष्णस्पर्शभास्वररूपयोरुपष्टम्भकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः। तस्मात्सुवर्णं तैजसमिति सिद्धम्।

******